M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 452

Title: Hitopadesha

452

हितोपदेश.

Incomplete

	Hitopadesha.	Title
	Nārāyana ~~Vishnu Sharma.~~	Author
		Editor
		Year, Vols.
		Publisher
452	Begins ~~& Ends~~ abrupt	Remarks

452

Hitopadesh

हि०उ० श्रीगणेशायनमः॥श्रीरामायनमः॥श्रीगुरुभ्योनमः॥अथद्वितीयाकथारंभः॥रा
जपुत्राऊचुः॥आर्यविष्णुशर्मन्ः श्रुतस्तावदस्माभिरिदानींसुहृद्भेदंश्रोतुमिच्छाम
१ ः॥॥विष्णुशर्मोवाच॥शृणुतायस्यायमाद्यःश्लोकः॥ ॥वर्द्धमानोमहान्स्नेहःसिंहगो
वृषयोर्वने॥पिशुनेनातिलुब्धेनजंबुकेनविनाशितः॥ ॥राजपुत्रैरुक्तं॥कथमे
तत्॥विष्णुशर्माकथयति॥अस्तिदक्षिणापथेसुवर्णवतीनामनगरी॥तत्रवर्द्धमानोना
मवणिग्निवसति॥तस्यप्रभूतेऽपिवित्तेअतिसमृद्धानपरान्बंधूनवलोक्य
पुनरर्थवृद्धिःकर्तव्येतिमतिर्बभूव॥यतः॥अधोधःपश्यतःकस्यमहिमानोपजा
यते॥उपर्युपरिपश्यंतःसर्वएवदरिद्रिताः॥१॥अपरंच॥ब्रह्महापिनरःपूज्योयस्या राम
स्तिविपुलंधनं॥शशिनस्तुल्यवंशोपिनिर्द्धनःपरिभूयते॥२॥अन्यच्च॥अव्यवसायि
नमलसंदैवपरंसाहसाच्चपरिहीनं॥प्रमदेवहिवृद्धपतिंनेच्छत्यवगूहितुंलक्ष्मीः॥ १
३॥किंच॥आलस्यंस्त्रीसेवासरोगिताजन्मभूमिवात्सल्यं॥संतोषोभीरुत्वंषड्व्याघाताम

हत्वस्य॥४॥यतः॥संपदास्थिरतांमन्योभवतिस्वल्पयापियः॥कृतकृत्योविधिर्मन्येनव
र्द्धयतितस्यतां॥५॥अपरंच॥निरुत्साहंनिरानंदंनिर्वीर्यमरिनंदनं॥मास्मसीमंति
नीकाचिज्जनयेत्पुत्रमीदृशं॥६॥तथाचोक्तं॥अलब्धंचैवलिप्सेतलब्धंरक्षेदवेक्षया॥
रक्षितंवर्द्धयेत्सम्यग्वृद्धंतीर्थेषुनिःक्षिपेत्॥७॥किंच॥अवर्द्धमानश्चार्थःस्वल्पव्यये ६
पिकालेनांजनवत्क्षयमेति॥अनुपभुज्यमानोव्यर्थएव॥तथाचोक्तं॥धनेनकिं
योनददातिनाश्नुतेबलेनकिंयश्चरिपून्नबाधते॥श्रुतेनकिंयेननधर्ममाचरेत्
किमात्मनायोनजितेंद्रियोभवेत्॥८॥अन्यच्च॥अंजनस्यक्षयंदृष्ट्वावल्मीकस्यच
संचयं॥अवंध्यंदिवसंकुर्याद्दानाध्ययनकर्मसु॥९॥यतः॥जलबिंदुनिपातेनक्रम
शःपूर्यतेघटः॥सहेतुःसर्वविद्यानांधर्मस्यचधनस्यच॥१०॥दानोपभोगहीनस्य
दिवसायस्ययांतिवै॥सलोभकारभस्त्रेवश्वसन्नपिनजीवति॥११॥इतिसंचिंत्यसंजी

हि.उ. वकनंदकनामानौ वृषभौ धुरि नियोज्य शकटं नानाविधद्रव्यपूर्णं कृत्वा वाणिज्येन
२ काश्मीरं प्रति चलितः॥ यतः॥ कोतिभारः समर्थानां किं दूरं व्यवसायिनां। को विदेशः
सविद्यानां कः परः प्रियवादिनां॥ १३॥ गच्छतस्तस्य दुर्जननाम्नि महारण्ये संजीव
को भग्नजानुर्निपतितः॥ तमालोक्याचिंतयद्वर्द्धमानः। करोतु नाम नीतिज्ञो व्यवसाय
मितस्ततः। फलं पुनस्तदेव स्याद्यद्विधेर्मनसि स्थितं॥ किंतु॥ विस्मयः सर्वथा हेयः प्र
त्यूहः सर्वकर्मणां। तस्माद्विस्मयमुत्सृज्य साध्यसिद्धिर्विधीयते॥ इति संचिंत्य संजीव
कं तत्र परित्यज्य वर्द्धमानः पुनश्चलितः। संजीवकोपि कथं कथमपि खुरत्रयेण भरं कृ
त्वोत्थितः॥ यतः॥ निमग्नस्य पयोराशौ पर्वतात्पतितस्य च॥ तक्षकेनापि दृष्टस्य आयुर्म
र्माणि रक्षति॥ ततो दिनेषु गच्छत्सु स्वेच्छाहारविहारादिनामेनारण्यं भ्राम्यन् हृष्टपु राम २
ष्टांगो बलवान्ननाद॥ तस्मिन्वने पिंगलकनामा सिंहः स्वभुजोपार्जितराज्यसुखमनु

भवन्नास्ते॥ तथा च॥ नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः॥ विक्रमार्जितवित्तस्य स्व
यमेव मृगेंद्रता॥ स चैकदा पिपासाकुलितः पानीयं पातुं यमुनाकच्छमवततार॥ तेन
च सिंहेन तत्र वनेऽननुभूतमपूर्वं प्रलयकालघनगर्जितमिव संजीवकनर्दितमश्रावि॥
तच्छ्रुत्वा चासौ पानीयमपीत्वा सचकितं परिवृत्य स्वस्थानमगमत्॥ ततः किमिदमित्यालो
चयंस्तूष्णीं स्थितः॥ स चकितस्तथाविधः करटकदमनकाभ्यां मंत्रिपुत्राभ्यां जंबुकाभ्यां दृ
ष्टः॥ तं दृष्ट्वा करटकं दमनक आह॥ सखे करटक किमित्ययमुदकार्थी स्वामी पानीय
मपीत्वा मंदं मंदं मवतिष्ठते॥ करटको ब्रूते॥ मित्र दमनक मम संमते अस्य सेवैव न
कार्या॥ किं पुनः स्वामिचेष्टानिरूपणं॥ यतोऽनेन राज्ञा चिरमवधीरिताभ्यामावाभ्यां
महद्दुःखमनुभूतं॥ अपि च॥ सेवया धनमिच्छद्भिः सेवकैः पश्य यत्कृतं॥ स्वातंत्र्यं य
च्छरीरस्य मूढैस्तदपि हारितं॥ १॥ शीतवातातपक्लेशान् सहंते ये पराश्रिताः। तदंशे
नापि मेधावी तपस्तप्त्वा सुखी भवेत्॥ २॥ एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता।

२

हि॰ उ

३ येपराधीनतांयाताःतेवैजीवंतिकेमृताः।३। एहिगच्छपतोत्तिष्ठवदमौनंसमाचर।एव
माशाग्रहग्रस्तैःक्रीडंतिधनिनोर्थिभिः।४॥ अबुधैरर्थलाभायपण्यस्त्रीभिरिवस्वयं।आ
त्मासंस्कृत्यसंस्कृत्यपरोपकरणीकृतः।५॥ विशेषश्च॥ प्रणमत्युन्नतिहेतोर्जीवितहेतो
र्विमुंचतिप्राणान्।दुःखीयतिसुखहेतोःकोमूढःसेवकादन्यः॥६॥ मौनान्मूकःप्रवचन
पटुर्वातुलोजल्पकोवाक्षांत्याभीरुर्यदिनसहतेप्रायशोनाभिजातः।पार्श्वेधृष्टोभवतिच
तथादूरतश्चाप्रगल्भःसेवाधर्मःपरमगहनोयोगिनामप्यगम्यः॥७॥ दमनकः॥मित्र
सर्वथानैतन्मनसापिमंतव्यं॥यतः॥ कथंनामनसेव्यंतेयत्नतःपरमेश्वराः।अचिरेणै
वयेतुष्टाःपूरयंतिमनोरथान्॥८॥ पश्य।कुतःसेवाविहीनानांचामरोद्धूतसंपदः॥ राम
उद्दंडधवलछत्रंवाजिवारणवाहिनी॥९॥ करटकोवदति।तथापिकिमनेनव्यापारेणा १
स्माकं।अव्यापारःसर्वथापरिहरणीयः।यतः।अव्यापारेषुव्यापारंयोनरःकर्तुमि
च्छति॥सएवनिधनंयातिकीलोत्पाटीववानरः॥१०॥ दमनकःपृच्छति।कथमेतत्॥कर

टकःकथयति॥अस्तिमगधदेशेधर्मारण्यसंनिधानेशुभदत्तनाम्नाकायस्थेनविहार
ःकारयितुमारब्धः।तत्रकरपत्रदार्यमाणस्तंभैःकस्यचित्तदूरोत्पाटितखंडद्वयमध्येकी
लंनिधायधृतं॥अथतत्रवनवासीमहावानरसमूहःक्रीडन्नागतः॥तत्रैकोवानरःका
लप्रेरितइवतंकीलकंहस्ताभ्यांधृत्वोपविष्टः॥तत्रस्फाटितस्तंभमध्येतस्यलंबमान
मुष्कद्वयंप्रविष्टं।अनंतरंसहजचंचलतयामहतायत्नेनतंकीलकंहस्ताभ्यामाकृष्टवान्॥
आकृष्टचूर्णिताण्डद्वयःसत्यंचत्वंगतः।अतोहंब्रवीमि।अव्यापारेष्वित्यादि॥दमनको
ब्रूते॥तथापिस्वामिनश्चेष्टानिरूपणंसेवकेनकर्तव्यमवश्यमेव॥करटकोवदत्॥य
:सर्वाधिकारेनियुक्तःप्रधानमंत्रीसकरोतु।यतोनुजीविनापराधिकारेचिंतानकर्त
व्या।यतः॥॥ पराधिकारचर्चायःकुर्यात्स्वामिहितेच्छया।सविषीदतिचीत्काराद्गर्द
र्दभोयथा॥१॥ दमनकःपृच्छति॥कथमेतत्।करटकःकरटकःकथयति॥अस्तिवाराण
स्यांकर्पूरपटोनामरजकः।सचैकराभिनवरूपयौवनयासहचिरात्केलिंकृत्वानिर्भरंसु

२

हि॰उ नः॥ अथानंतरं तद्गृहं द्रव्यापहर्तुं चौरः प्रविष्टः॥ तस्य प्रांगणे गर्दभो बद्धस्तिष्ठति॥ कु
कुरश्चोपविष्टः॥ अथ गर्दभः श्वानमाह। तव तावदयं व्यापारः। तत्किमिति त्वमुच्चैः शब्दं कृ
४ त्वा स्वामिनं जागरय॥ कुक्कुरो ब्रूते॥ मम नियोगस्य चर्चा किं त्वया कर्तव्या। त्वमेव जानासि
। यथाहमेतस्य गृहस्य रक्षां करोमि॥ ततोयं चिरान्निर्वृत्तो ममोपयोगं न जानाति तेनाधुनाम
माहारदानेपि मंदादरः॥ यतो विना विधुरदर्शनं स्वामिनोनुजीविषु मंदादरा भवंति॥ गर्द
भो ब्रूते। शृणु वर्वर। याचते कार्यकाले यः स किं भृत्योथवा सुहृत्॥ कुक्कुरोप्याह॥ शृणु ता
वत्। भृत्यान्संभाषयेद्यस्तु कार्यकाले स किं प्रभुः॥ यतः॥ आश्रितानां भृतौ स्वामिसेवा
यां धर्मसेवने। पुत्रस्योत्पादने चैव न संति प्रतिहस्तकाः॥ गर्दभः सकोपमाह॥ पापीयांस्त्वं
यः स्वामीकार्योपेक्षामेवं करोषि॥ भवतु यथा स्वामी जागर्ति तन्मया कर्तव्यं॥ यतः॥ पृ राम
ष्ठतः सेवयेदर्कं जठरेण हुताशनं॥ स्वामिनं सर्वभावेन परलोकममायया॥ इत्युक्त्वा स ची ४
त्कारं कृतवान्। ततस्तेन चीत्कारशब्देन स रजको जागरितः॥ निद्राविमर्दकोपादुत्थाय ल
मा

कुटैस्ताडयामास॥ अतोहं ब्रवीमि॥ पराधिकारचर्चामित्यादि॥ पश्य॥ पशूनाम
न्वेषणोऽस्मन्नियोगः॥ सा च विनियोगचर्चा क्रियतां। किं त्वद्य तयापि न प्रयोजनम
स्ति। आवयोस्तावद्भक्षितशेष आहारः प्रचुरस्तिष्ठति। दमनकः सकोपमाह। कथमाहा
रार्थी भवानेवं सेवते। एतदयुक्तमुक्तं॥ सुहृदामुपकारकारणाद्द्विषतामप्यपका
रकारणात्॥ नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलं॥ अपि च॥ यस्मिन्जी
वति जीवंति बहवः स तु जीवति। बकोपि किं न कुरुते चंच्वा स्वोदरपूरणं॥ पश्य॥ पंचभि
र्याति दासत्वं पुराणैः कोपि मानवः। कोपि लक्षैः कृती कोपि लक्षैरपि न लभ्यते॥ मनु
ष्यजातौ तुल्यायां भृत्यत्वमतिगर्हितं। प्रथमो यो न तत्रापि स किं जीवत्सु गण्यते। तथा
प्युक्तं॥ वाजिवारणलोहानां काष्ठपाषाणवाससां॥ नारीपुरुषतोयानामंतरं महदंत
रं। तथाहि॥ स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थि गोः श्वा लब्ध्वा परितोषमेति
न भवेत्तस्य क्षुधाशांतये॥ सिंहो जंबुकमंकमागतमपि त्यक्त्वा निहंति द्विपं सर्वः क

९

हि.उ. ५ छुगतोपिवांछतिजनःसत्वानुरूपंफलं।अपरंच॥पश्य॥सेव्यसेवकयोरंतरं॥लांगू
लचालनमधश्चरणावपातंभूमौनिपत्यवदनोदरदर्शनंच।श्वापिंडदस्यकुरुतेगज
पुंगवस्तुधीरंविलोकयतिचाटुशतैश्चभुंक्ते॥किंच।यज्जीव्यतेक्षणमपिप्रथितंमनुष्यै
र्विज्ञानविक्रमयशोभिरभग्नमानं।तन्नामजीवितमिहप्रवदंतितज्ज्ञाःकाकोपिजीवतिचि
रंचबलिंचभुंक्ते॥अहितहितविचारशून्यबुद्धेःश्रुतिसमयैर्बहुभिर्वहिःकृतस्य॥उदर
भरणमात्रकेवलेच्छोःपुरुषपशोश्चपशोश्चकोविशेषः॥करटकोब्रूते॥आवांतावदप्रधा
नौतथाप्यावयोःकिमनयाविचारणया।दमनकःपुनराह॥कियताकालेनामात्याःप्रधा
म नतांप्रधानतांवालभंते॥यतः॥नकस्यचित्कश्चिदिहस्वभावाद्भवत्युदारोभिमतःखलोवा॥ राम
लोकेगुरुत्वंविपरीततांवास्वचेष्टितान्येवनरंनयंति॥किंच॥आरोप्यतेशिलाशैलेयथा ५
यत्नेनमहीयसा॥निपात्यतेक्षणेनाधस्तथात्मागुणदोषयोः॥तदत्रस्वायत्तोह्यात्मासर्व
स्य॥करटकोब्रवीत्॥अथभवान्किंवदति॥सआह॥अयंतावत्स्वामीपिंगलकःकथम

च१

११ऽ यात्स्वकितंपरिवृत्योपविष्टः।करटकोब्रूते॥किंतत्रत्वंजानासि॥दमनकोऽवदत्।किम
त्राविदितमस्ति॥उक्तंच।उदीरितोर्थःपशुनापिगृह्यतेहयाश्चनागाश्चवहंतिदेशिताः॥
अनुक्तमप्यूहतिपंडितोजनःपरेंगितज्ञानफलाहिबुद्धयः॥तदत्रभयप्रस्तावेस्मे
नंप्रभावेनात्मीयंकरिष्यामि।यतः॥प्रस्तावसदृशंवाक्यंसद्भावसदृशंप्रियं।आत्मानमन्य
तेप्रीतंभूपालस्यसदुर्मतिः॥दमनकोवदति॥भद्रकथमहंसेवानभिज्ञः।पश्य॥किमप्य
स्तिस्वभावेनकिंसुंदरमसुंदरं॥यदेवरोचतेयस्मैभवेत्तत्तस्यसुंदरं।यतः॥यस्ययस्यहि
योभावस्तेनतेनहितंनरं॥अनुप्रविश्यमेधावीक्षिप्रमात्मवशंनयेत्॥अपिच॥कोत्रेत्य
हमितिब्रूयात्सम्यगादेशयेतिच॥आज्ञामवितथांकुर्याद्यथाशक्तिमहीपतेः॥अपरंच॥
अल्पेच्छोधृतिमानप्राज्ञःछायेवानुगतःसदा।आदिष्टोनविकल्पेतसराजवसतिंवसेत्॥
करटकोब्रूते॥कदाचित्त्वामनवसरप्रवेशादवमन्यतेस्वामी॥दमनकोब्रूते॥अस्त्वेवं।त
थाप्यनुजीविनासांनिध्यमवश्यंकरणीयं॥यतः॥दोषभीतेरनारंभःकापुरुषस्यलक्ष

२

हि.उ. णं॥केरजीर्णभयात्प्राप्तभोजनंपरिहीयते॥पश्य॥आसन्नमेवनृपतिर्भजतेमनुष्यंविद्यावि
हीनमकुलीनमसंगतंवा॥प्रायेणभूमिपतयःप्रमदालताश्चयःपार्श्वतोभवतितंपरिवे
६ ष्टयंति॥करटकोवदति॥अथतत्रगत्वाकिंवक्ष्यसि।दमनकोवदत॥शृणुकिमनुरक्तोवि
रक्तोमयिस्वामीतिविज्ञास्यामि॥तावत्।करटकोब्रवीत॥किंतत्रज्ञानलक्षणं।दमनकोवद
ति।दूरादवेक्षणंहासःसंप्रश्नेष्वादरोभृशं।परोक्षेपिगुणश्लाघास्मरणंप्रियवस्तुषु।तथा
चसेवकेप्यनुरक्तिश्चदानेप्रीतिविवर्द्धनं।अनुरक्तेश्चलिंगानिजानीयान्मतिमान्नरः॥एत
ज्ज्ञात्वायथायंममायत्तोभविष्यति।तद्वक्ष्यामि।यतः।अप्रायसंदर्शनजीविपत्तिरुपाय
संदर्शनजोचसिद्धिं।मेधाविनोनीतिविधिप्रयुक्ताःपुरःस्फुरंतीमिवदर्शयंति॥करटकोब्रूते॥ राम
तथाप्यप्राप्तेप्रस्तावेनवक्तुमर्हसि।यतः॥अप्राप्तकालवचनंबृहस्पतिरपिब्रुवन्॥प्रा ६
प्नुयात्बुद्ध्यवज्ञानमपमानंचकेवलं॥दमनकोवदति॥मित्रमाभैषीः।नाहमप्राप्ताव
सरवचनंवक्ष्यामि॥यतः॥आपद्युन्मार्गगमनेकार्यकालात्ययेषुच॥अपृष्टेनापिवक्तव्यं
षी

भृत्येनहितमिच्छता॥यदिचप्राप्तावसरेणापिवचनंनमयावक्तव्यमिति।तदामंत्रित्व
मेवममानुपपन्नं॥यतः॥कल्पयतियेनवृत्तिंयेनचलोकेप्रशस्यतेसद्भिः।सगुणस्ते
नचगुणिनारक्ष्यस्संवर्द्धनीयश्च।तद्भद्रअनुजानीहिमांगच्छामि॥करटकः॥शुभ
मस्तु॥यथाभिलषितमनुष्ठीयतां॥इतिउवाच॥गम्यतामर्थलाभायक्षेमायविजयायच॥
शत्रूणांचविनाशायपुनरागमनायच॥ततोदमनकःसविस्मयइवपिंगलकसमीपंग
तः॥अथदूरादेवराज्ञासादरंप्रवेशितः॥साष्टांगपातंप्रणम्योपविष्टः।राजाह॥दमनक
चिराद्दृष्टोसि॥दमनकोब्रूते॥नकिंचिद्देवपादानांमयाप्रयोजनमस्ति॥तथापिप्राप्त
कालमनुजीविनासांनिध्यमवश्यंकरणीयमित्यागतोस्मि॥किंतु॥दंतस्यनिर्घर्षणा
केनवापिकर्णस्यकंडूयनकेनवापि॥तृणेनकार्यंभवतीश्वराणांकिमंगवाक्पाणिव
तानरेण।यद्यपिचिरेणावधीरितस्यमेबुद्धिनाशोनशक्यते॥तथाहि।मणिर्लुठति
पादेषुकाचःशिरसिधार्यते।यथैवास्तितथैवास्तिकाचःकाचोमणिर्मणिः॥अन्यच्च॥

हि०७ धैर्यैकवर्थे पुरुषस्यन्त्नं बुद्धेर्विनाशो नहि शंकनीयः। अधः कृतस्यापि तनूनपातो नाधः
शिखायाति कदाचिदेव॥ देवसविशेषेण स्वामिना सर्वदा भवितव्यं॥ यतः॥ निर्विशेषं यदा
राजा समं सर्वेषु वर्त्तते॥ तदोद्यमसमर्थानामुत्साहः परिहीयते॥ किंच॥ त्रिविधाः पुरु
७ षा राजन्नुत्तमाधममध्यमाः॥ नियोजयेत्तथैवैतांस्त्रिविधेष्वेव कर्मसु॥ स्थान एव नि
योज्यन्ते भृत्याश्चाभरणानि च॥ न हि चूडामणिः पादे नितरामेव शोभते॥ किंच॥ कनक
भूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रतिबध्यते॥ न च विरौति न चापि न शोभते
भवति योजयितुर्वचनीयता॥ पश्य॥ बुद्धिमाननुरक्तोयमिदोभयमयं जनः॥ इति भृ
त्यविचारज्ञो भृत्यैरापूर्यते नृपः॥ तथाहि॥ अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च॥ राम
पुरुषविशेषं प्राप्य भवति योग्यायोग्याश्च॥ अन्यच्च॥ किं भक्तेनासमर्थेन किं शक्तेना ७
पकारिणा॥ भक्तं शक्तं च मां राजन्नावज्ञातुं त्वमर्हसि॥ यतः॥ अवज्ञानाद्राज्ञो भवति म
तिहीनः परिजनस्तथा तद्वत्ताहं त्वमर्हसि॥ ततस्तत्प्रामाण्याद्व्रजति न समीपं बुधजनः॥

बुधैस्त्यक्ते राज्ये भवति न हि नीतिर्गुणवती विपन्नायां नीतौ सकलमवशं सीदति जगत्॥
अपि च॥ देव॥ जनं जनपदा नित्यमर्चयन्ति नृपार्चितं॥ नृपेणावमतो यस्तु स सर्वैरव
मन्यते॥ किंच॥ बालादपि गृहीतव्यं युक्तमुक्तं मनीषिभिः॥ रवेरविषये किन्न प्रदीपस्य प्र
काशनं॥ पिंगलकोब्रवीत्॥ भद्र दमनक किमेतत्। त्वमस्मदीयप्राधान्यामात्यपुत्रस्त्वमे
वेयंतं कालं यावत्कुतोपि खलवचनान्नागतोसि॥ इदानीं यथाभिमतं ब्रूहि॥ दमनको ब्रूते॥
देव पृच्छामि किंचित्॥ पिंगलक उवाच॥ उच्यतां॥ दमनकः कथयति॥ तृषार्त्तः स्वामी पानी
यमपीत्वा किमिति विस्मित इव तिष्ठति॥ पिंगलकोब्रवीत्॥ भद्रमुक्तं॥ किन्तु तद्वक्तुं न काश्चि
द्विश्वासभूमिरस्ति॥ शृणु॥ कथयामि॥ वनमिदमपूर्वसत्त्वाधिष्ठितं॥ अतोस्माकं त्याज्यं॥
तथाच श्रुतस्त्वयाप्यपूर्वः शब्दो महान्॥ शब्दानुरूपेणास्य प्राणिनो बलेन सुमहता भ
वितव्यं॥ दमनक उवाच॥ देव अस्ति तावदयं महान्भयहेतुः॥ शब्दोस्माभिरप्याकर्णितः॥
किंतु॥ स किं मंत्री यः प्रथमं भूमित्यागं युद्धं चोपदिशति॥ अपरं च॥ भृत्यानामप्युपयो

हि॰उ॰ गोज्ञातव्य एव॥ यतः॥ बंधुस्त्रीभृत्यवर्गस्य बुद्धेः सत्वस्य चात्मनः॥ आपन्निकषपाषाणे नरो जा
८ नाति सारतां॥ सिंहो ब्रूते॥ भद्र मां महती शंका बाधते॥ दमनकः॥ स्वगतम् अन्यथा किं त्वं राज्यसु
खं परित्यज्यास्मान्संभाषसे॥ प्रकाशं ब्रूते॥ देव यावदहं जीवामि तावद्भयं न कर्तव्यं॥ किंतु॥
४ ती करटकादयोप्याश्वास्यंतां। यस्मादापत्प्रतीकारकाले दुर्लभस्समुदायः पुरुषाणामिति॥ ततस्तौ
दमनककरटकौ राज्ञा सर्वस्वेनापि पूजितौ। भयप्रतीकारं प्रतिज्ञाय चलितौ। करटको गच्छन्
दमनकमाह। सखे किं शक्यः प्रतीकारः। अयं भयहेतुरशक्यः प्रतीकारो चेत्यज्ञात्वा भयोपश
मं प्रतिज्ञाय कथमयं महान्प्रसादो गृहीतः॥ यतः॥ अनुपकुर्वाणो न कस्याप्युपहारं गृह्णी
यात् विशेषतः स्वराज्ञः॥ पश्य॥ यस्य प्रसादे पद्मास्ते विजयश्च पराक्रमे॥ मृत्युश्च वसति क्रो
धे सर्वतेजोमयो हि सः॥ तथा हि॥ बालोपि नावमंतव्यो मनुष्य इति भूमिपः॥ महती देवता ह्ये राम
षा नररूपेण संस्थिता॥ दमनको विहस्याह॥ मित्र तूष्णीं मया भयकारणं ज्ञातं। बलीव ८
र्द्दनर्दितं तत्। वृषभाश्चास्माकमपि भक्ष्याः किं पुनः सिंहस्य। करटको ब्रूते॥ यद्येवं तदा

स्वामित्रासस्तत्रैव किन्नापनीतः। दमनको वदत्॥ यदि तत्रैव मुच्यते। तदा कथमयं प्रसा
दलाभः स्यात्॥ अपरं च॥ निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन॥ निरपेक्षं प्रभुं कृ
त्वा भृत्यः स्याद्दधिकर्णवत्॥ करटको ब्रूते॥ कथमेतत्॥ दमनकः कथयति। अस्त्यर्बुदशि
खरनाम्नि पर्वते महाविक्रमो नाम सिंहः॥ तस्य पर्वतकंदरामधिशयानस्य केशराग्रं कश्चि
न्मूषकश्छिनत्ति॥ स सिंहः केशराग्रं लूनं बुद्ध्वा कुपितस्तं विवरांतर्गतं मूषकमलभमानं
विचिंतयत्॥ किं विधेयमत्र॥ भवत्वेवं श्रूयते। क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्नैव लभ्य
ते। तमाहंतुं पुरस्कार्यः सदृशस्तस्य सैनिकः॥ इत्यालोच्य तेन ग्रामं गत्वा दधिकर्णनामा
बिडालः स्वकंदरे मांसाहारं दत्वा प्रयत्नादानीय धृतः॥ तद्भयान्मूषको बहिर्न संचरति।
तेनासौ सिंहोऽक्षतकेशरः सुखं स्वपिति॥ मूषकशब्दमपि यदा यदा शृणोति॥ तदा
तदा सो सविशेषं मांसाहारदानेन तं बिडालं संवर्द्धयति॥ अथैकदा स मूषकः क्षुधापी
डितो बहिः संचरन् बिडालेन प्राप्तो व्यापादितः॥ अनंतरं यदाकदाचिदपि तस्य मूषक

हि॰उ॰ सशब्दंचिरान्नशुश्राव॥तदोपयोगाभावात्तस्यविडाजस्याहारदानेऽपिमंदादरोबभूव।
८ ततोसावाहारविरहात्दुर्बलोमुमूर्षुरभवत्।अतोहंब्रवीमि।निरपेक्षइति॥ततोदम
नककरटकौसंजीवकसमीपंगतौ॥तत्रकरटकःतरुतलेसाटोपमुपविष्टः।दमन
केनोक्तं॥अरेवृषभएषराज्ञापिंगलकेनारण्यरक्षायांनियुक्तःसेनापतिः॥करटकस्त्वां
समाज्ञापयति॥सत्वरमागच्छनोचेदितोरण्याद्दूरमपसर॥अन्यथातेविरुद्धंपतिष्यति।
ततोदेशव्यवहारानभिज्ञःसंजीवकःसभयमुपसृत्यकरटकंप्रणतवान्।तथाचोक्तं॥म
तिरेवबलाद्गरीयसीतदभावेकरिणामियंदशा॥इतिघोषयतीवडिंडिमःकरिणांहस्तिपका १
हतःक्वणन्।संजीवकःकथयति।सेनापतेकिंकर्त्तव्यंमया।करटकोब्रूते॥यद्यत्रवनेति राम
ष्ठसितदास्मद्देवपादारविंदंगत्वाप्रणम।संजीवकोवदति॥तदभयवाचंप्रयच्छ।गच्छा ८
मि।करटकेनोक्तं॥अलमनयाशंकया।यतः।तृणानिनोन्मूलयतिप्रभंजनोमृदूनि
नीचैःप्रणतानिसर्वतः॥समुच्छ्रितानेवतरून्प्रबाधतेमहान्महत्येवकरोतिविक्रमं॥त

तौसंजीवकंनातिदूरेव्यवस्थाप्यपिंगलकानिकटंगतौ।ततोराज्ञासादरमवलोकि
तौ॥प्रणम्योपविष्टौ॥राजाह॥दृष्टःसः॥दमनकोवदति।देवदृष्टः॥किंतुदेवेन ज्ञातं
तथा।तन्महाबलोसौदेवंद्रष्टुमिच्छति॥ततःसज्जीभूयोपविश्यस्थितः॥किंतुदेव।शब्द
मात्रादेवनभेतव्यं।तथाचोक्तं॥शब्दमात्रान्नभेतव्यमज्ञात्वाशब्दकारणं॥शब्दहेतुं
परिज्ञायकुट्टनीगौरवंगता।राजाह।कथमेतत्।दमनकःकथयति।अस्तिश्रीपर्वत
मध्येब्रह्मपुराभिधानंनगरं॥तस्यप्रदेशशिखरेघंटाकर्णोनामराक्षसःप्रतिवसति।
इतिजनप्रवादःश्रूयते॥घंटाप्रशब्दःसदानश्रूयते॥एकदाघंटामादायपलायमा
नःकश्चिच्चोरस्तत्रव्याघ्रेणव्यापादितःखादितश्च॥तत्पाणिपतिताचघंटावानरैःप्रा
प्तातेचवानरास्तांघंटांवादयंति॥ततस्तन्नगरजनैःसमनुष्यःखादितोदृष्टः॥प्रति
क्षणंघंटावादश्च श्रूयते॥अनंतरंघंटाकर्णःकुपितोमनुष्यंखादति॥घंटांचवाद
यति॥इत्युक्त्वाजनाःसर्वेपलायितास्तन्नगरात्॥ततःकरालानामकुट्टन्याविमृश्यम

२

हि·उ· मर्कटाघंटांवादयंतीतिस्वयंपरिज्ञायाराज्ञाविज्ञप्तः॥देवयदिधनक्षयःक्रियते।तदाघंटाकर्ण

१० महंसाधयामि॥ततोराज्ञाधनंदत्तं।कुट्टन्याचमंडलपूजागराचआद्याचार्यगौरवंदर्शयित्वा

स्वयंवानरप्रियफलान्या~~मंडलपूजा~~दायवनेप्रविश्यफलान्यवकीर्णानि।ततोघंटांपरित्य

ज्यवानराःफलासक्ताबभूवुः॥कुट्टनीचघंटांगृहीत्वासत्वरंसमागता॥सकललोकपूज्या

भवत्॥अतोहंब्रवीमि॥शब्दमात्रादित्यादि॥ततःसंजीवकमानीयदर्शनंकारितः॥पश्चात्तत्रै

वान्योन्यामात्यदर्शनंकारितः॥ततःसामान्येनचिरंनिवसति॥अथकदाचित्तस्यसिंहस्य

भ्रातास्तब्धकर्णनामसिंहःसमागतः।तस्यातिथ्यंकृत्वोपविश्यपिंगलकस्तदाहारायपशू

न्हंतुंचलितः॥तत्रांतरेसंजीवकोब्रूते॥देवाद्यहतमृगाणांमांसंक्व॥राजाह॥दमनककर

टकौजानीतः॥संजीवकोब्रूते॥ततोज्ञायतांकिमस्तिनास्तिवा॥सिंहोविमृश्याह॥नास्त्येवं राम

तत्॥संजीवकोवदति॥ताभ्यांकथमेतन्मांसंखादितं॥राजाह॥खादितं॥व्ययितं।अवधीरि १०

तंचप्रत्यहमेषक्रमः॥संजीवकः॥कथंतावद्देवपादानामगोचरेणैवक्रियते॥राजाह॥अथ

किं॥संजीवकः॥नैतदुचितं॥यतः॥नानिवेद्यप्रकुर्वीतभर्तुःकिंचिदपिप्रियं।कार्यमापत्प्रती

कारादन्यत्रजगतीपतेः॥कमंडलूपमोमात्यस्तनुत्यागीबहुग्रहः॥नृपतेःकिंक्षणोमूर्खो

दरिद्रःकिंवराटकः॥अपरंच॥तस्यायत्यांसदाश्रेयोयःकाकिण्यापिवर्द्धते॥कोषःकोषवतः

प्राणाःप्राणान्यैःप्राणान्नृपतेः॥किंवान्यैःस्वकुलाचारैःसेव्यतांपुरुषः॥धनहीनःस्वपत्न्यापि

त्यज्यतेकिंपुनःपरैः॥एतच्चराज्येप्रधानंदूषणं॥पश्य॥अतिव्ययोनवेक्षाचतथार्जनमधर्म

तःदूषणंदूषणांदूरंसंस्थानोकोषव्यसनमुच्यते॥यतः॥क्षिप्रमायमनालोच्यव्ययमानः

स्ववांछया॥अवणायतएवासौधनीवैश्रवणोपमः॥स्तब्धकर्णोब्रूते॥शृणुभ्रातश्चिराश्रि

तावेतौदमनककरटकौसंधिविग्रहकार्याधिकारिणौच।कार्याधिकारेचनार्थाधिकारेनियो

क्तव्यौ॥अपिच॥नियोगप्रस्तावेयत्किंचिच्छ्रुतंतत्कथयामि॥ब्राह्मणःक्षत्रियोबंधुर्नाधिकारे

प्रशस्यते॥ब्राह्मणःसिद्धमप्यर्थंकृच्छ्रेणापिनयच्छति॥नियुक्तःक्षत्रियोद्रव्येखड्गंदर्शयते

ध्रुवं॥सर्वार्थंग्रसतेबंधुराक्रम्यज्ञातिभावतः॥अपराधेपिनिःशंकोनियोगीचिरसेवकः॥ससा

२

हि॰उ॰ स्वामिन भवतायं चरेद्य निरवग्रहः॥उपकर्त्ताधिकारस्थः स्वापराधंनमन्यते॥उपकारंध्वजीकृत्य सर्व
११ मेवविलुंपति॥सभाप्युक्रीडतो मात्यःस्वयंराजायतेनृप॥अवज्ञा क्रियतेतेनसदापरिचयाद्ध्रुवं॥अंत
राम र्दुष्टःक्षमायुक्तःसर्वानर्थकरःकिलः॥सकुनिःशकटारश्च दृष्टांतावत्रभूपतेः॥सदापन्नामसाधुस्यात्
मूढःसर्वएवहि॥सिद्धानामयमादेश ऋद्धिश्चित्तविकारिणी॥प्राप्तार्थग्रहणंद्रव्ये परीवर्त्तोऽनु
रोधनं॥उपेक्षाबुद्धिहीनत्वंभोगोमात्यस्यदूषणं॥नियोग्यर्थग्रहोपायोराजन्नित्यंपरीक्षणं॥प्रतिपत्ति
प्रदानंचतथाकर्मविपर्ययः॥नापीडितावमत्युच्चैरंतःसारंमहीपतेः॥दुष्टव्रणाइवप्रायोभवंतिहि
नियोगिनः॥मुहुर्नियोगिनोबोधावसुधारामहीभृतो॥सकृत्किंपीडितंस्नानवस्त्रंमुंचेद्घृतंपयः॥
एतत्सर्वथावसरेज्ञात्वाव्यवहर्त्तव्यं॥पिंगलकःपुनराह॥अस्तितावदयमेवंमतौसर्वथानममवच
नकारिणौ॥सच कर्णो ब्रूते॥एतच्च सर्वथानुचितं॥यतः॥आज्ञाभंगकरान्राजानक्षमेतसुतानपि॥राम
विशेषकोनुराजश्चराज्ञश्चित्रगतस्यच॥विशेषतस्य॥तस्करेभ्योनियुक्तेभ्यःशत्रुभ्योनृपवल्लभात्॥११
नृपतिर्निजलोभाच्चप्रजारक्षेत्पितेवहि॥भ्रातःसर्वथास्मद्वचनंक्रियतां॥आहारोऽस्माभिःकृत

एव॥अयंशस्यभक्षकः॥संजीवकोऽर्थाधिकारेनियुज्यतां॥तथानुष्ठितेसति पिंगलकसंजीव
कयोःसर्वबंधुभृत्यपरित्यागेनमहताम्नेहेनकालोवर्त्तते॥अतोऽनुजीविनामप्याहारदानशै
थिल्याद्दमनककरटकावन्योन्यंचिंतयतः॥ततोदमनकआह॥किमत्रकर्त्तव्यमात्मकृतोयंदोषः॥
स्वयंकृतेप्यदोषपरिदेवनविनोदोसुलभः॥तथाचोक्तं॥स्वर्णलेखामहंस्पृष्ट्वाबद्ध्वात्मानंचदूतिका॥
आदित्सुश्चमणिंसाधुःस्वदोषाद्दूषितास्त्रयः॥करटकःपृच्छति॥कथमेतत्॥दमनकःकथयति॥अ
स्तिकांचनपुरनाम्निनगरेवीरविक्रमोनामराजातस्यधर्माधिकारिणाकश्चिन्नापितोवध्यभूमिं
नीयमानः॥कंदर्पकेतुनाम्नापरिव्राजकेनसाधुद्वितीयेननायंवध्यइत्युक्त्वावस्त्रांचलेसमा
कृष्टः॥राजपुरुषाऊचुः॥किमितिनायंवध्यः॥सआह॥श्रूयतां॥स्वर्णलेखेत्यादि॥ततआ
हुः॥कथमेतत्॥परिव्राट्कथयति॥अहंसिंहलनाम्नोद्वीपस्यभूपतेर्जीमूतकेतोःपुत्रःकं
दर्पकेतुः॥अथैकदाकेलिकाननावस्थितेनपोतवणिङ्मुखाच्छ्रुतंमया॥यदत्रसमुद्रमध्येचतुर्दश्या
माविर्भूतकल्पतरुतलेरत्नमणिकिरणावलीकर्बुरेपर्यंकेस्थितासर्वालंकारभूषितालक्ष्मीरिववीणां

शु॰उ॰ वादयेतीकन्याकाश्चिद्दृश्यत इति॥ ततोहं वनिजमादाय पोतमारुह्य तत्र गतः॥ अनंतरं तत्र गत्वाश्र
१२ ईमन्नासा मयावलोकिता॥ ततस्तल्लावण्यगुणाकृष्टेन मयापि तत्पार्श्वे झंपः कृतः॥ तदनंतरं कन
कपत्तनं प्राप्य सुप्तासा तथैव पर्यंकावस्थिता विद्याधरीभिरुपास्यमाना मयावलोकिता॥ तयाप्य
हं दूरादेव दृष्ट्वा सखीप्रस्थापनेसेभाषितः॥ ततस्सख्याच मया पृष्टया ख्यातं॥ एषा कंदर्पकेलिनाम्नो वि
द्याधरचक्रवर्तिनः पुत्री॥ रत्नमंजरीनाम॥ अथ प्रवृत्ते गांधर्वविवाहे तया सह रममाणस्तत्राहं
तिष्ठामि॥ ततएकदा रहसि कदाचित्तयोक्तं स्वामिन्नेतद्भयास्सर्वमिदमुपभोक्तव्यमेषा चित्रगतास्व
र्णलेखा नाम विद्याधरीन कदाचिदपि स्प्रष्टव्या॥ पश्चादुपजातकौतुकेन स्वर्णलेखा मयाहस्तेन स्प
ष्टा॥ तयाचित्रगतया पृष्टं तथा कृत्वा चरणप्रहारेण हतः। यथा गत्वा स्वराष्ट्रे पतितः॥ अथ दुःखार्तोहं राम
प्रव्रजितः॥ पृथिवीं भ्राम्यन्निमां नगरीमनुप्राप्तः॥ अत्रातिक्रांतदिवसे गोपगृहे सुप्तः मंनपश्यं प्र १२
दोषसमये सुहृदापानकादागतः स गोपः स्ववधूं दूत्या सह मंत्रयंतीमपश्यत्॥ ततस्तां गोपीं ताडयि
त्वा स्तंभे बद्ध्वा सुप्तः॥ ततोर्द्धरात्रे सा देवास्य नापितस्य वधूर्दूती पुनस्तां गोपीमुवाच॥ तव वियोग

नलदृष्टोसौ मु॰ मूर्षुर्वर्तते महानुभावस्तदहमत्रात्मानं बद्ध्वा तिष्ठामि॥ त्वं तत्र गत्वा संभा
ष्य सत्वरमागच्छ॥ तथानुष्ठिते सति स गोपः प्रबुद्धोऽवदत्॥ इदानीं जारांतिकं किं न यासि॥ ततो य
दासौ न किंचिद्ब्रूते॥ तदा दर्पान्मम वचनस्योत्तरमपि न ददासीत्युक्त्वा प्रकुपितेन गोपेनास्या ना
सा छिन्ना॥ अथागता सा गोपीमपृच्छत्। का वार्त्ता॥ अनया दूत्योक्तं॥ मुखमेव मे वार्त्तां कथयति॥
अनंतरं सा गोपी तथा बद्धात्मानं स्थिता॥ इयं दूती तां छिन्नां नासिकां गृहीत्वा निजगृहं प्रविश्य
स्थिता॥ ततः प्रातरनेन नापितेन क्षुरभांडं याचितासती लियं क्षुरमेकं प्रादात्॥ अथ पश्चाद्यं नापि
तः कुपितः॥ क्षुरं दूरादेव गृहे निक्षिप्तवान्॥ अथ कृतार्त्तरावेयं विनापराधं ममानेन नासिका छि
न्नेत्युक्त्वा धर्माधिकारिणः समीपमागतवती॥ सा च गोपी तेन गोपेन पुनः पृष्टोवाच॥ अरे पाप
को मां महासतीं निरूपयितुं समर्थः किमन्यत्॥ मम व्यवहारमष्टौ लोकपाला जानंति॥ किं
च॥ आदित्यचंद्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च संध्ये धर्म
श्च जानाति नरस्य वृत्तं॥ पश्य मन्मुखं॥ ततो यावदसौ गोपः प्रदीपमानीय तन्मुखं पश्यति॥

१
हि॰उ॰
१३

तावद्दृत्तंतन्मुखमवलोक्यतत्कर्णयोःपतितःपश्चादयमास्तेसाधुरेतद्वृत्तांतमपिश्रृणुत॥
अयंस्वगृहान्निःसृतोद्वादशवर्षैर्मलयोपकंठादिमांनगरीमनुप्राप्तः॥ अत्रचवेश्यागृहे
सुप्तःतत्रकुट्टन्यागृहद्वारिस्थापितकाष्ठघटितवेतालस्यमूर्द्धिरत्नमेकमुत्कृष्टमारोपितमा
स्ते।तत्रतेनतद्रत्नलुब्धेनानेनसाधुनारात्रावुत्थायहस्तोयदारत्नेदत्तस्तदैवतेनवेताले
नसूत्रसंचारितेनबाहुभ्यांपीडितःसन्नार्त्तनादमसौचकार॥ पश्चादुत्थायकुट्टन्योक्तं॥ पु
त्रमलयोपकंठादागतोसि॥ तत्सर्वरत्नानिप्रयच्छ॥ नोचेदनेननत्यक्तव्योसि॥ इत्थमेवायंचे
टकः॥ ततोनेनसर्वरत्नानिसमर्पितानि॥ अधुनाऽयमपिहृतसर्वस्वोस्मासुमिलितः॥ ए अता० ४
तत्सर्वंश्रुत्वाराजपुरुषैर्न्यायितःप्रवर्त्तितः॥ अतोहंब्रवीमि॥ स्वर्णलेखेत्यादि॥ स्वयंकृतोयं राम
दोषस्तत्रविलपितुमपिनोचितं॥ क्षणंविमृश्य॥ मित्रसदृश॥ यथामयासौहृदमनयोःकारि १३
तं॥ तथामित्रभेदोपिमयाकार्यः॥ यतः॥ अतथ्यान्यपितथ्यानिदर्शयंत्यतिपेशलाः॥ समेनि
म्नोन्नतानीवचित्रकर्मविदोजनाः॥ अपिच॥ उत्पन्नेषुकार्येषुमतिर्यस्यनहीयते।सनिस्त

स्तरतिदुर्गाणिगोपीजारद्वयंयथा॥ करटकःपृच्छति॥ कथमेतत्॥ दमनकःकथयति॥ अस्
तिद्वारवत्यांनगर्यांकस्यचिद्गोपस्यवधूर्बंधकी॥ साग्रामस्यदंडनायकेनतत्पुत्रेणचसमंरम
ते॥ तथाचोक्तं॥ नाग्निस्तृप्यतिकाष्ठानांनापगानांमहोदधिः॥ नांतकःसर्वभूतानांनपुं
सांवामलोचना॥ अपरंच॥ नदानेननमानेननार्जवेननसेवया॥ नशस्त्रेणनशास्त्रेणसर्व
दाविषमाःस्त्रियः॥ अथकदाचिदपिदंडनायकपुत्रेणसहरममाणातिष्ठति॥ अथदंडना
यकोप्यागतः।तंदृष्ट्वातत्पुत्रंकुशूलेधृत्वादंडनायकेनसमंतथैवक्रीडति॥ अनंतरंतस्या
भर्त्तागोपःसमागतः।तमालोक्यगोप्योक्तं॥ दंडनायकत्वंलकुटंहस्तेगृहीत्वासत्वरंकोपं
दर्शयन्याहि॥ तथातेनानुष्ठितेनगोपालकेनागत्यभार्यापृष्टाकेनकार्येणदंडनाय
कोत्रसमागतःसाब्रूते॥ अयंकेनापिकारणेनपुत्रस्योपरिक्रुद्धः॥ सचमार्यमाणोत्रागत्य
प्रविष्टः॥ मयाकुशूलेनिःक्षिप्यरक्षितः॥ पिताचान्विष्यअत्रागत्यगृहेनदृष्टः॥ अ
तोयंदंडनायकःक्रुद्धएवगच्छति॥ ततःसातत्पुत्रंकुशूलादवतार्यदर्शयति॥ तथाचोक्तं॥

२

हि॰उ आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा। षड्गुणो व्यवसायश्च कामश्चाष्टगुणाः स्मृताः॥
अतोहं ब्रवीमि॥ उत्पन्नेष्वित्यादि॥ करटको ब्रूते॥ अस्त्वेवं॥ किं त्वनयोर्महान्निसर्गस्नेहः क
१४ थं भेदयितुं शक्यः॥ दमनकः कथयति॥ उपायश्चिंतनीयः। तथा चोक्तं॥ उपायेन हि यच्छक्यं
न तच्छक्यं पराक्रमैः॥ काक्या कनकसूत्रेण कृष्णसर्पो निपातितः॥ करटको ब्रूते॥ कथमेतत्॥
दमनकः कथयति॥ देवकृतांतरेणातिदूरं विद्याधरो गिरिः॥ तत्र शालतरौ वायसदंपती निवस
तः॥ ततश्चापत्यानि तत्र तरुकोटरावस्थितेन कृष्णसर्पेण खादितानि॥ ततः पुनर्गर्भवती वा
यसी ब्रूते। स्वामिन् त्यज्यतामयं तरुः॥ अत्रैतस्मात्कृष्णसर्पादावयोः संततिः कदापि न भविष्य
ति॥ यतः॥ दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः॥ ससर्पे च गृहे वासो मृत्युरेव न संशयः॥ वा राम
यसो वदत्॥ प्रियेन भेतव्यं॥ वारंवारं मयैतस्य महापराधः सोढः वायस्याह॥ कथमेतेन बलव १४
ता सार्द्धं भवान् विग्रहीतुं समर्थः॥ वायसः पुनराह॥ अलमनयाशंकया॥ यतः॥ बुद्धिर्यस्य ब
लं तस्य निर्बुद्धेस्तु कुतो बलं। पश्य सिंहं मदोन्मत्तं शशकेन निपातितं॥ वायस्याह॥ कथमेतत्॥

वायसः कथयति॥ अस्ति मंदराभिधाने पर्वते दुर्दांतो नाम सिंहः॥ स च सर्वदा पशुवधं कुर्वन्ने
वास्ते ततः सर्वैः पशुभिर्मिलित्वा सिंहो विज्ञप्तः॥ किमिति सर्वपशुवधः क्रियते॥ वयमेव भवदा
हारार्थमेकैकं पशुं ढौकयामः॥ सिंहेनोक्तं एवमस्तु॥ ततः प्रभृत्येकैकं पशुं भक्षयन्नास्ते॥
अथ कदाचिद्वृद्धशशकस्य वारः समायातः। सोऽचिंतयत्॥ त्रासहेतोर्विनीतिः क्रियते जीविता
शया॥ पंचत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे॥ तन्मंदं मंदमुपगच्छामि॥ ततः सिंहोपि क्षु
धापीडितः कोपात्तमुवाच॥ कुतस्त्वं विलंब्यागतोसि॥ स ब्रूते॥ नाहमपराध्यः। दुःपथि सिं
हांतरेण बलवता बलाद्धृतः॥ पुनरागमनाय सपथं कृत्वा स्वामिनं निवेदयितुमागतः॥ सिंहः
सकोपमाह सत्वरं गत्वा दर्शयतां॥ क्वासौ दुरात्मा तिष्ठति॥ ततस्तं गृहीत्वा शशको गंभीरकूपं
गतः॥ अत्रागत्य पश्यतु स्वामीत्युक्त्वा तस्मिन् कूपजले तस्यैव सिंहस्य प्रतिबिंबं दर्शितवा
न्। ततोसौ दर्पाध्मातः कोपात्तस्योपर्यात्मानं निक्षिप्य पंचत्वं गतः॥ अतोहं ब्रवीमि। बुद्धिर्यस्ये
त्यादि। वायस्याह॥ श्रुतं मया सर्वं यथा कर्तव्यं ब्रूहि॥ वायसोऽवदत्॥ अथ प्रमाते सरसि रा

२

पं०: जपुत्रःसततमागत्यस्नातितंतदंगात्स्वतारितकनकसूत्रंचबद्धाश्वलानीयास्मिन्कोटरेधरिष्य
सियत्नेथा।अथकदाचित्स्नातेजलंप्रविष्टेराजपुत्रेवायस्यातदनुष्ठितं।ततःकनकसूत्रानुस
१५ रणप्रवृत्तैराजपुरुषैःकोटरेनिरूप्यमाणेःसकृष्णसर्पोदृष्टोव्यापादितश्च॥अतोहंब्रवीमि॥
उपायेनेत्यादि।यद्येवंतदागच्छ।शिवास्तेपंथानःसंतु॥ततोदमनकः॥पिंगलकसमीपं
गत्वाप्रणम्योवाच॥आत्ययिकंमन्यमानआगतोस्मि॥यतः।आपद्युन्मार्गगमनेकार्यका
लात्ययेषुच॥कल्याणवचनंब्रूयादपृष्टोपिहितोनरः॥अपिच॥भोगस्यभाजनंराजानराजा
कार्यभाजनं॥राजकार्यपरिभ्रंशान्मंत्रीदोषेणलिप्यते।तथाहिपश्य॥अमात्यानामेषक्र
मः॥वरंप्राणपरित्यागःशिरसोवापिकर्तनं।नतुस्वामिपदावाप्तिपातकेच्छानुपेक्षणं॥पिंगल राम
कउवाच॥सादरः।अथभवान्किंवक्तुमिच्छति॥दमनकउवाच॥अयंतावत्संजीवकस्तवोपरि १५
असदृशव्यवहारीतथाचमत्संनिधानेस्वामिनःशक्तित्रयनिंदांकृत्वाराज्यमेवाभिलषति॥
एतच्छ्रुत्वापिंगलकःसभयंसाश्चर्यंतूष्णींस्थितः॥दमनकउवाच॥देवसर्वामात्यान्परित्य

गंकृत्वात्वयैवायंसकलकार्याधिकारीकृतः॥अयंचमहान्दोषः॥यतः॥अत्युच्छ्रितेमंत्रि
णिपार्थिवेचविष्टभ्यपादावुपतिष्ठतेश्रीः॥साश्रीस्वभावादसहाभरस्यतयोर्द्वयोरेकतरंज
हाति॥अपरंच॥एकंभूमिपतिःकरोतिसचिवंराज्येप्रमाणंयदातंमोहाच्छ्रयतेमदःसचम
दालस्याद्वैवनिर्भिद्यते॥निर्भिन्नस्यपदंकरोतिहृदयेतस्यस्वतंत्रस्पृहास्वातंत्र्यस्पृहयाततःस
न्नृपतेःप्राणांतिकंद्रुह्यति॥अपिच॥अविदग्धस्यचभुक्तस्यदंतस्यचलितस्यच॥अमात्य
स्यचदुष्टस्यमूलादुद्धरणंसुखं॥किंच॥यःकुर्यात्सचिवायत्तांश्रियंतद्व्यसनेसतिसिद्धान
मयमादेशअद्धिष्ठिन्नविकारिणी।सचसर्वकार्येषुस्वेच्छातःप्रवर्त्तते॥तदत्रप्रमाणंस्वामी॥
एतच्चजानाति॥नसोस्तिपुरुषोराजन्योनकामयतेश्रियं॥परस्ययुवतीरम्योसाकांक्षेनेक्ष
तेहिकः॥सिंहोविमृश्याह॥भद्रयद्यप्येवंतथापिसंजीवकेममहान्स्नेहः॥पश्य॥कुर्वन्न
पिव्यलिकानियःप्रियःप्रियएवसः॥अनेकदोषदुष्टोपिकायःकस्यनवल्लभः॥अपरंच॥
अप्रियाण्यपिकुर्वाणोयःप्रियःप्रियएवसः।दग्धमंदिरसारेपिकस्यवह्नावनादरः॥दमनक

हि॰उ॰ पुनराह। देव स एव दोषः॥ यतः॥ यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः॥ सुतेमात्येप्युदासी
१९ ने स लक्ष्म्याश्रीयते नरः॥ शृणु देव॥ अप्रियस्यापि पथ्यस्य परिणामः सुखावहः॥ वक्ता श्रोता च
यत्रास्ति रमंते तत्र संपदः॥ त्वया च मूलभृत्यानपास्यायमागंतुकः पुरस्कृतः॥ एतच्चानुचि
तं कृतं॥ मूलभृत्यापराधेन नागंतून्प्रतिमानयेत्॥ नातः परतरो न्योस्ति राज्ये भेदंक
रोतियः॥ सिंहो ब्रूते॥ किमाश्चर्यमसौ मया अभयवाचं दत्वानीतः संवर्द्धितश्च तत्कथं द्रुह्यति॥
दमनको वदति॥ देव॥ दुर्जनो विकृतिं याति सेव्यमानोपि नित्यशः॥ स्वेदनाभ्यंजनोपायैः श्व
पुच्छमिव नामितं॥ अन्यच्च॥ वर्द्धनं वाथ संमानं खलानां प्रीतये कुतः॥ फलंत्यमृतसेके
पि न पथ्यानि विषद्रुमाः॥ अतोहं ब्रवीमि॥ अपृष्टोपि हितं ब्रूयाद्यस्य नेच्छेत्पराभवं॥ एष ए
व सतां धर्मो विपरीतो न्यथा सतां॥ तथा चोक्तं॥ स स्निग्धोकुशलान्निवारयति यस्तत्कर्म य राम
न्निर्मलं सा स्त्री यानुविधायिनी स मतिमान्यः सद्भिरभ्यर्चितः॥ सा श्रीर्या न मदं करोति स सुखी १६
यस्तृष्णया मुच्यते तन्मित्रं यदयं[illegible]त्रणं स पुरुषो यः खिद्यते नेंद्रियैः॥ तद्यदि संजीव

कव्यसनार्दितो विज्ञापितः स्वामी न निवर्त्तते तदा भृत्ये न दोषः॥ तथा च॥ नृपः कामासक्तो न
गणयति कार्यं न च हितं यथेष्टं स्वच्छंदः प्रविचरति मत्तो गज इव॥ ततो मानाध्मातः स पतति यदा
शोकगहने तदा भृत्ये दोषं क्षिपति न निजं वेत्त्यविनयं॥ पिंगलकः स्वगतं॥ न परस्य प्रवादेन परेषां
दंडमाचरेत्॥ आत्मनावगमं कृत्वा बध्नीयात्पूजयेत्तु वा॥ तथा चोक्तं॥ गुणदोषावनिश्चित्य वि
धिनाग्रहनिग्रहे॥ स्वनाशाय यथा न्यस्तो दर्पात्सर्पमुखे करः॥ प्रकाशं ब्रूते॥ तत्किं संजीवकः
प्रत्यादि[illegible]श्यतां॥ दमनकः ससंभ्रममाह॥ देव मा मैवं॥ एतावता मंत्रभेदो जायते॥ तथा चो
क्तं॥ मंत्रबीजमिदं गुप्तं रक्षणीयं यथा तथा॥ मनागपि न भिद्येत तद्भिन्नं न प्ररोहति॥ किंच॥ मं
त्री योधश्च वा धीरः सर्वांगैः संहतैरपि॥ चिरं न सहते [illegible] स्थातुं परेभ्यो भेदशंकया॥ यदासौ
सदोषोपि दोषात्संनिवृत्य संधातव्यस्तदतीवानुचितं॥ सकृद्दुष्टं हि यन्मित्रं पुनः संधातु
मिच्छति॥ स मृत्युमुपगृह्णाति गर्भमश्वतरी यथा॥ अन्यच्च॥ अतो दुष्टः क्षमायुक्तः स
र्वानर्थकरः किल॥ [illegible] शकुनिः शकटारश्च दृष्टांतावत्र भूपते॥ सिंहो ब्रवीत्॥ ज्ञायतां ताव

२

हि॰उ॰ किमस्माकमसौ कर्त्तुं समर्थः॥ सत्वाह॥ अंगांगिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः॥ पश्य टि
ट्टिभमात्रेण समुद्रो व्याकुलीकृतः॥ सिंहः पृच्छति॥ कथमेतत्॥ स कथयति॥ लवणसमुद्रती
१८ रे टिट्टिभमिथुनं दंपती निवसतः॥ टिट्टिभी चासन्नप्रसवा भर्त्तारमाह॥ नाथ प्रसवयोग्यं निभृ
तं स्थानमन्विष्यतां॥ टिट्टिभोवदत्॥ ननु इदमेव स्थानं॥ साब्रूते॥ नाथ समुद्रवेलया व्याप्यते
स्थानमेतत्॥ सोप्याह॥ भद्रे किमहमशक्तः स्वगृहे व्यवस्थितः॥ समुद्रेण विग्रहीतव्यः॥ टि
ट्टिभी दुर्विहस्याह॥ स्वामिंस्त्वया समुद्रेण सह महदंतरं॥ अथवा॥ डुःखमात्मा परिछेत्तु
मेवं योग्यो न वेति वा॥ ईदृशं यस्य विज्ञानं स कृच्छ्रेपि न सीदति॥ ततः स्वामिवचनात्तत्रैव सा
प्रसूता॥ अथ समुद्रेणापि तच्छक्तिजिज्ञासार्थं तदंडान्यपहृतानि॥ टिट्टिभी शोकार्त्ता भर्त्तारमा राम १८
ह नाथ कष्टमापतितं॥ तान्यंडानि मे नष्टानि॥ टिट्टिभोवदत्॥ प्रिये माभैषीः॥ इत्युक्त्वा पक्षि
णां मेलकं कृत्वा पक्षिस्वामिनो गरुडस्य समीपं गतः॥ तद्वचनमाकर्ण्य गरुडेन स्वप्रभुर्ना
रायणः सृष्टिस्थितिप्रलयहेतुर्विज्ञप्तः॥ ततो भगवदाज्ञां मौलौ निधाय समुद्रेण तान्यंड

डानि समर्पितानि॥ अतोहं ब्रवीमि॥ अंगांगिभावेत्यादि॥ राजाह॥ कथमसौ ज्ञातव्यो द्रोह
बुद्धिरिति॥ दमनकः कथयति॥ यदासौ शृंगाग्रप्रहरणाभिमुखश्चकित इवागच्छति त
दा ज्ञास्यति स्वामी॥ एवमुक्त्वा संजीवकसमीपं गतः॥ तत्र मंदं मंदमुपसर्पन् विस्मित
मिवात्मानमदर्शयत्॥ संजीवकेन सानंदमुक्तं॥ भद्र कुशलं दमनकः॥ अनुजीविनां कुतः
कुशलं॥ यतः॥ संपत्तयः पराधीनाः सदा चित्तमनिर्वृतं। स्वजीवितेप्यविश्वासस्तेषां
ये राजसंश्रिताः॥ अन्यच्च॥ कोर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदोस्तं गताः स्त्री
भिः कस्य न खंडितं भुवि मनः को नाम राज्ञां प्रियः॥ कः कालस्य न गोचरांतरगतः को
र्थी गतो गौरवं को वा दुर्जनवागुरासु पतितः क्षेमेण जातः पुमान्॥ संजीवकेनोक्तं॥
सखे ब्रूहि॥ दमनकोप्याह॥ किं ब्रवीमि मंदभाग्योहं॥ पश्य॥ यथा समुद्रे निमज्ज
न् लब्ध्वा सर्पावलंबनं नो मुंचति न चादत्ते तद्वन्मुग्धोस्मि संप्रति॥ यतः॥ एकत्र राजवि
श्वासो नश्यत्यन्यत्र बांधवः॥ किं करोमि क्व गच्छामि पतितो डुःखसागरे॥ इत्युक्त्वा निश्व

२

हि॰उ स्योपविष्टः संजीवकः ॥ तथापि सविस्तरं मित्र मनोगतमुच्यतां ॥ दमनकः सुनिभृतमा
१८ ह ॥ यद्यपि राजविश्वासो न कथनीयस्तथापि भवानस्मदीयप्रत्ययादागतः स्थितस्त्वतन्म
या परलोकार्थिनावश्यं तव हितमाख्येयं ॥ शृणु ॥ अयं स्वामी तवोपरि विकृतबुद्धिः
४ ह रस्येवक्तुं च संजीवकमेव हत्वा स्वपरिवारं तर्पयामीति ॥ एतच्छ्रुत्वा संजीवकः परं विषादमुपा
गमत् ॥ दमनकः पुनराह ॥ अलं विषादेन प्राप्तकालमनुष्ठीयतां ॥ संजीवकः क्षणं विमृश्या
ह ॥ सुष्ठु खल्विदमुच्यते ॥ दुर्जनगम्या नार्थः प्रायेणापात्रभृद्भवति राजा कृपणानुसा
रि च धनं देवो गिरिदुर्गधिवर्षी च ॥ स्वगतं किमेतद्विचेष्टितं न वेत्त्येतद्व्यवहारेण निर्णेतुं न शक्यते ॥
यतः ॥ कश्चिदाश्रयसौंदर्याद्धत्ते शोभामसज्जनः ॥ प्रमदालोचनन्यस्तं मलीमसमिवांजनं ॥ राम
प्रकाशं ब्रूते ॥ किमेतत् ॥ आराध्यमानो नृपतिः प्रयत्नान्न तोषमायाति किमत्र चित्रं ॥ अयं १८
त्वपूर्वः प्रतिमाविशेषः यः सेव्यमानो रिपुतामुपैति ॥ तदयमशक्यार्थः प्रमेयः ॥ यतः । नि
मित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति ॥ अकारणद्वेषिमनस्तु यस्य

कथं जनस्तं परितोषयिष्यति ॥ अथवा । किं मयापकारं राज्ञः । अथ निर्निमित्तापका
रिणो हि राजानः दमनकः कथयति । एवमेतत् ॥ शृणु ॥ वित्तैः स्निग्धैरुपकृतमपि द्वेष्यता
मेति किंचित्साक्षादन्यैरपकृतमपि प्रीतिमेवोपयाति ॥ दुर्ग्राह्यत्वान्नृपतिमनसां नैकभा
वाश्रयाणां सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ कृतशतमसत्सु नष्टं सुभा
षितशतं च नष्टमबुधेषु ॥ वचनशतमवचनकरे बुद्धिशतमचेतने नष्टं ॥ किंच ॥ चंदन
गों तरुषु भुजंगा जलेषु कमलानि तत्र च ग्राहाः ॥ गुणघातिनः संति खला भोगेषु न सुखान्य
विघ्नानि ॥ दमनकः पुनराह ॥ अयं तावत्स्वामी वाचि मधुरो विषमहृदयो मया ज्ञातः ॥
यतः ॥ दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारितार्द्धासनो गाढालिंगनतत्परः प्रियकथा
प्रश्नेषु दत्तादरः । अंतर्गूढविषो बहिर्मधुमयश्चातीव मायापटुः को नामायमपूर्वनाट
कविधिर्यः शिक्षितो दुर्जनैः ॥ तथाहि । पोतो दुस्तरवारिराशितरणे दीपोंधकारागमे निर्वा
ते व्यजनं मदांधकरिणां दर्पोपशांत्यै सृणिः ॥ इत्थं तद्भुवि नास्ति यस्य विधिना नोपाय

चिंताकुलमन्येदुर्जनचित्तवृत्तिर्हरणोधातापिभस्तोयमः संजीवकः कथयति ॥ कष्टंभोः क
थमहंशस्पभक्षकः सिंहेनहंतव्यः ॥ पुनर्विचिंत्याह ॥ नजानेकेनायंममोपरिराजाविकारि
तः ॥ भेदमुपगताद्राज्ञः सदाभेतव्यं ॥ यतः ॥ वज्रेवराजतेजश्चद्वयमेवातिभीषणं ॥ एकमे
कत्रपततिपतत्यन्यः समंततः ॥ ततःसंग्राममन्तःपुरेवाश्रीयतां तदानानुबन्धेनमयुक्तं ॥ य
तः ॥ मृतः प्राप्स्यामिवास्वर्गंशत्रुंहत्वासुखानिच ॥ उभावपिहिशूराणांगुणावेतौसुदुर्ल
भौ ॥ युद्धकालश्चायं ॥ तथाचोक्तं ॥ यत्राऽयुद्धेध्रुवोमृत्युः युद्धेजीवितसंशयः ॥ तमेवकाले
युद्धस्यप्रवदंतिमनीषिणः ॥ भोमित्रकथयकथमसौमांजिघांसुरितिज्ञातव्यं ॥ दमनको
ब्रवीत् ॥ यदासौस्तब्धकर्णः समुन्नतलांगूलः समुन्नतचरणोविवृतास्यस्त्वांपश्यति तदा
त्वमपिस्वविक्रमंदर्शयिष्यसि ॥ यतः ॥ बलवानपिनिस्तेजाः कस्यनाभिभवास्पदं ॥ निःशंकं राम
दीयतेलोकैः पश्यभस्मचयेपदं ॥ किंतुसर्वमेतत्सुप्रच्छन्नंकर्तव्यं ॥ नोचेन्नत्वंनाहमपि ॥ एव १८
मुक्त्वादमनकः करटकसमीपंगतः ॥ करटकेनोक्तं किंनिष्पन्नं ॥ सत्र्याह ॥ निष्पन्नो

साबन्योन्यभेदः ॥ करटकः ॥ कः संदेहः ॥ यतः ॥ बंधुः कोनामदुष्टानांकुप्येत्कोनातिया
चितः ॥ कोनतृप्यतिवित्तेनकुकृत्येकोनपंडितः ॥ अपिच ॥ दुर्वृत्तः क्रियतेधूर्तैः श्रीमाना
त्मविवृद्धये ॥ किंनामखलसंसर्गः कुरुतेनाश्रयाशवत् ॥ ततोदमनकः पिंगलकसमीपं
गतः ॥ देवसमागतोसौपापाशयः ततःस्थिरीभूयस्थीयतामित्युक्त्वापूर्वोक्तमाकारंकार
यामास ॥ संजीवकोप्यागतस्तथाविधंसिंहंदृष्ट्वास्वानुरूपंविक्रमंचकार ॥ ततस्तयोः
प्रवृत्तेमहाहवे संजीवकः सिंहेनव्यापादितः ॥ अथपिंगलकः संजीवकंव्यापाद्यविश्रांतः
सशोकइवावतिष्ठते ब्रूतेच ॥ किंमयादारुणंकर्मकृतं ॥ यतः ॥ परैः संभुज्यतेराज्यंस्वयंपा
पस्यभाजनं ॥ धर्मातिक्रमतोराजा सिंहोहस्तिवधादिव ॥ अपिच ॥ भूम्येकदेशस्यगुणा
न्वितस्यभृत्यस्यवाबुद्धिमतः प्रणाशः ॥ भृत्यप्रणाशोमरणंनृपाणांनष्टापिभूमिः
सुलभानभृत्याः ॥ दमनकोब्रूते ॥ स्वामिन्कोयंनूतनोन्यायः ॥ यदरिंहत्वासंतापः क्रि
यते ॥ तथाचोक्तं ॥ पितावायदिवाभ्राता पुत्रोवायदिवासुहृत् ॥ प्राणच्छेदकराराज्ञाहंतव्या

हि.उ. भूतिमिच्छता ॥ अपि च ॥ अपि धर्मार्थतत्वज्ञो नैकांतकरुणो भवेत् ॥ नहि हस्तस्थमप्यर्थं
क्षमावान्रक्षितुं क्षमः ॥ किंच ॥ क्षमा शत्रौ च मित्रे च यतीनामेव भूषणं ॥ अपराधेषु सत्वेषु नृपा
१० णां सैव दूषणं ॥ अपरंच ॥ राजा घृणी ब्राह्मणः सर्वभक्षः स्त्री चावशा दुःप्रकृतिः सहायः ॥
प्रेष्यः प्रतीपोधिकृतः प्रमादी त्याज्या अमी यश्च कृतं न वेत्ति ॥ विशेषतश्च ॥ दू ॥ देवरूपमे
वैतत् ॥ सत्यानृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या ॥ नित्यव्यया
प्रचुररत्नधनागमा च वेश्यांगनेव नृपनीतिरनेकरूपा ॥ इति दमनकेन संतोषितः स्वां प्र राम
कृतिमापन्नः ॥ पिंगलकः सिंहासने उपविष्टः ॥ दमनकः प्रहृष्टमना विजयतां महाराजः शुभ २०
मस्तु यथासुखमवस्थितः ॥ विष्णुशर्मोवाच ॥ सुहृद्भेदः श्रुतः ॥ राजपुत्रा ऊचुः ॥ श्रुतः सुखिनो
भूता वयं ॥ विष्णुशर्मा ब्रवीत् ॥ पुनरेवमस्तु ॥ सुहृद्भेदस्तावद्भवतु भवतां शत्रुनिलये खलः
कालाकृष्टः प्रलयमुपसर्पत्वहरहः ॥ जनो नित्यं भूयात्सकलसुखसंपत्तिवसतिः
कथारामे रम्ये सततमिह बालोऽपि रमतां ॥ इति श्री हितोपदेशे सुहृद्भेदो नाम द्वितीयः

॥श्रीगणेशायनमः॥ ॥

नरमाबूहं

हि॰ उ॰ १

श्रीगुरुदेवताभ्यो नमः॥ पुनः कथारंभकाले राजपुत्रैरुक्तं॥ आर्यराजपुत्रा वयं तद्विग्र
हं श्रोतुं नः कुतूहलमस्ति॥ विष्णुशर्मणोक्तं। यदेवं भवद्भ्यो रोचते तत्कथयामि। विग्रहः श्रूय
तां॥ यस्यायमाद्यः श्लोकः॥ हंसैः सह मयूराणां विग्रहे तुल्यविक्रमे॥ विश्वास्य वंचिता हंसाः
काकैः स्थित्वारिमंदिरे॥१॥ राजपुत्रा ऊचुः॥ कथमेतत्। विष्णुशर्मा कथयति। अस्ति क
र्पूरद्वीपे पद्मकेलिनामधेयं सरः॥ तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति। स सर्वैर्ज
लचरैः पक्षिभिः पक्षिराज्ये ऽभिषिक्तः॥ यतः॥ यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजाः॥
अकर्णधारा जलधौ विप्लवेतेह नौरिव॥१॥ अपरंच॥ प्रजां संरक्षति नृपः सा वर्द्धयति पा
र्थिवं॥ वर्द्धनाद्रक्षणं श्रेयस्तदभावे तदप्यसत्॥२॥ एकदासौ राजहंसः विस्तीर्णसु
वर्णकमलपर्यंके सुखासीनः परिवारपरिवृतस्तिष्ठति॥ ततः कुतश्चिद्देशादागत्य दीर्घमु रा॰ म॰ १
खो नाम बकः प्रणम्योपविष्टः। राजोवाच॥ दीर्घमुख देशांतरादागतोसि तद्वार्त्तां कथय॥ स
ब्रूते॥ देव महती वार्त्तास्ति तामाख्यातुकाम एवाहं सत्वरमायातः॥ श्रूयतां तत्॥ अस्ति जंबूद्वी

पे विंध्यो नाम गिरिः॥ तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति॥ तस्यानुचरैश्चरद्भिरहं
दग्धारण्यमध्ये चरन्नवलोकितः पृष्टश्च॥ कस्त्वं। कुतः समागतोसि॥ ततो मयोक्तं॥ अहं कर्पू
रद्वीपचक्रवर्त्तिनो हिरण्यगर्भस्य राजहंसस्यानुचरः कौतुकाद्देशांतरं द्रष्टुमागतः॥ एत
च्छ्रुत्वा पक्षिभिरुक्तं॥ तदनयोः को देशो भद्रतरो राजा च॥ ततो मयोक्तं॥ आः किमेवमुच्यते॥
महदंतरं॥ यतः कर्पूरद्वीपः स्वर्ग एव॥ राजहंसश्च द्वितीयः स्वर्गपतिः॥ अत्र मरुस्थले पतिताः किं
यूयं कुरुथ॥ आगम्यतामस्मद्देशे गम्यतां॥ ततस्तद्वचनमाकर्ण्य ते पक्षिणः सकोपा बभू
वुः॥ तथाच॥ पयःपानं भुजंगानां केवलं विषवर्द्धनं। उपदेशो हि मूर्खाणां प्रकोपाय न शांतये॥१॥
अन्यच्च॥ विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन॥ वानरानुपदिश्याथ स्थानभ्रष्टा ययुः
खगाः॥ राजोवाच॥ कथमेतत्॥ दीर्घमुखः कथयति॥ अस्ति नर्मदातीरे पर्वतोपत्यकायां
विशालः शाल्मलीतरुः॥ तत्र तरौ निर्मितनीडकोटरे पक्षिणः सुखं वर्षास्वपि वसंति॥ अथ
नीलपटैरिव जलधरपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव। ततो वानरांस्तरु

३

हि॰ ३ ततोसौ शीतार्त्तान्कंपमानानवलोक्य पक्षिभिराख्यातं कृपया। भोभो वानराः श्रृणुत॥ अ
२ स्माभिर्निर्मितानीडाश्चंचुमात्राहृतैस्तृणैः। हस्तपादादिसंयुक्ता यूयं किमवसीदथ॥१॥ तच्छ्रु
त्वाजातामर्षैर्वानरैरालोचितं॥ निर्वातनीडगर्भावस्थाःसुखिनः पक्षिणोऽस्मान्निंदंति॥
तद्भवतु तावद्वृष्टेरुपशमः॥ अनंतरं शांते पानीयवर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीडा भग्ना
स्तेषां पक्षिणामंडानि चाधः पातितानि॥ अतोहं ब्रवीमि विद्वानित्यादि॥ राजाब्रूते॥ ततस्तैः
॥ बकः कथयति। ततः कोपात्पक्षिभिरुक्तं॥ केनासौ राजहंसः कृतो राजा॥ ततो मयाप्युपजा
तकोपेनोक्तं॥ अयं ते मयूरः केन राजा कृतः॥ एतच्छ्रुत्वा मां ते हंतुमुद्यताः॥ ततो मयापि स्व
विक्रमो दर्शितः॥ यतः॥ अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः। पराक्रमः परिभ
वे वैयात्यं सुरतेष्विव॥१॥ राजा विहस्योवाच॥ आत्मनश्च परेषां च यः समीक्ष्य बलाबलं। राम
अंतरं नैव जानाति स तिरस्क्रियतेऽरिभिः॥२॥ अपि च॥ सुचिरं हि चरन्नित्यं क्षेत्रे शस्य २
मबुद्धिमान्॥ द्वीपिचर्मपरिछन्नो वाग्दोषाद्गर्दभो हतः॥१॥ बकः पृच्छति॥ कथमेतत्॥ राजा

कथयति॥ अस्ति हस्तिनापुरे विलासो नाम रजकः॥ तस्य गर्दभोऽतिवाहाद्दुर्बलो मुमूर्षुरभ
वत्॥ ततो रजकेनासौ व्याघ्रचर्मणा प्रछाद्यारण्यसंनिधाने शस्यमध्ये प्रयुक्तः॥ ततो व्याघ्रबुद्ध्या
दूरात्तमवलोक्य क्षेत्रपतयः सत्वरं पलायंते॥ अथ केनापि शस्यरक्षकेन धूसरकंबलकृततनुत्राणेन
धनुःकांडं सज्जीकृत्यावनतकायेन स्थितं॥ तं च दूरे दृष्ट्वा स गर्दभः पुष्टांगो जातबलो गर्दभी
यमिति ज्ञात्वा शब्दं कुर्वाणस्तदभिमुखं धावितः॥ ततस्तेन गर्दभोयमिति शस्यरक्षकेन लीलयैव
व्यापादितः॥ अतोहं ब्रवीमि॥ सुचिरमिति॥ ततस्ततः॥ दीर्घमुखो ब्रूते॥ पश्चात्तैः पक्षिभिरुक्तं॥
अरे पाप दुष्ट बक॥ अस्माकं स्वामिनमधिक्षिपसि तन्न क्षंतव्यमिदानीमित्युक्त्वा सर्वे मां चंचुभि
र्हत्वा यमसंदिरं प्रापयामीति सकोपा ऊचुः॥ पश्य रे मूर्ख स हंसस्तव सर्वथा मृदुः। तस्य राज्या
धिकार एव नास्ति॥ यतः॥ एकांततो मृदुः करतलगतमप्यर्थं रक्षितुं न क्षमः॥ कथं स पृथिवीं शा
स्ति। राज्यं वा तस्य कीदृशं॥ त्वं च कूपमंडूकस्तेन तदाश्रयमामुपदिशसि॥ श्रृणु॥ सेवितव्यो म
हावृक्षः फलछायासमन्वितः। यदि दैवात्फलं नास्ति छाया केन निवार्यते॥१॥ अन्यच्च॥ ही
नसेवा न कर्तव्या कर्तव्यो महदाश्रयः॥ पयोपि शौंडिनीहस्ते मद्यमित्यभिधीयते॥२॥ किंच॥

३

हि·उ· हीनाश्रयो न कर्तव्यः कर्तव्यो महदाश्रयः। अजासिंहप्रसादेन वने चरति निर्भया॥३॥ अपरं च॥
महानप्यल्पतां याति निर्गुणे गुणविस्तरः॥ आधाराधेयभावेन। गजेंद्र इव दर्पणे॥४॥ विशेष
तश्च॥ व्यपदेशेऽपि सिद्धिः स्यादतिशक्ते नराधिपे॥ शशिनो व्यपदेशेन शशकाः सुखमेधते॥
३ ५॥ मयोक्तं। कथमेतत्॥ पक्षिराड्ब्रूते॥ कदाचिद्वर्षास्वपि वृष्टेरभावात्तृषार्तो गजयूथो यूथपति
माह। नाथ कोऽभ्युपायोऽस्माकं। अस्य क्षुद्रजंतूनां निमज्जनस्थानं वयं च निमज्जनाभावा
दंधा इव क यामः किं कुर्मः॥ ततो हस्तिराजो नातिदूरं गत्वा निर्मलं ह्रदं दर्शितवान्॥ ततस्तीरस्थितश
शकाश्च गजपादाहतिभिश्चूर्णीकृताः॥ शि॥ अनंतरं शिलीमुखनामा वृद्धशशकश्चिंतयामास। अ
नेन गजयूथेन पिपासाकुलितेन प्रत्यहमत्रागंतव्यं॥ अतो विनश्यत्यस्मत्कुलं॥ ततो विजयो नामाति राम
वृद्धशशकोऽवदत्॥ मा विषीदत। अत्र प्रतीकारो मया कर्तव्यः॥ ततोऽसौ प्रतिज्ञाय चलितः। गच्छता तेना ३
लोचितं॥ कथं मया गजयूथनिकटे गत्वा वक्तव्यं॥ यतः॥ स्पृशन्नपि गजो हंति जिघ्रन्नपि भुजं
गमः। पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः॥६॥ अतोऽहं पर्वतशिखरमारुह्य यूथनाथं वदा
मीति संचिंत्य पर्वतशिखरस्थितेन तेन कथितं॥ भो गजयूथनाथ श्रूयतां मम वचनं॥ यूथनाथोऽव

द

वदत्॥ कस्त्वं कुतः समागतः। स ब्रूते। दूतोऽहं भगवता चंद्रेण प्रेषितः॥ यूथपतिराह। कार्यमुच्यतां॥
विजयो वदति। उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा॥ ते यथार्थस्य वक्तारो ह्यवध्या हि भवादृशाः॥७॥ त
दहं तदाज्ञया ब्रवीमि॥ चंद्रस्यादेशं शृणु॥ यदेते चंद्रसरोरक्षकाः शशकास्त्वया निःसारितास्तदनु
युक्तं कृतं॥ यतो रक्षणीयाः शशकास्तेऽस्मदीयाः॥ अत एव शशांक इति प्रसिद्धिः। एवमुक्तवति दू
ते यूथपतिर्भयादिदमाह॥ इदमज्ञानतः कृतं पुनर्न गमिष्यामि। दूत उवाच॥ तदत्र सरसि भगवंतं
चंद्रमसं कोपात्कंपमानं प्रणम्य प्रसाद्य गच्छ॥ ततो रात्रौ नीत्वा जले चंचले चंद्रबिंबं दर्शयित्वा
स यूथपतिः प्रणामं कारितः॥ देव अज्ञानादनेन कृतं क्षम्यतामित्युक्त्वा प्रस्थापितः॥ अतोऽहं ब्रवीमि॥
व्यपदेशेऽपि सिद्धिः स्यादित्यादि॥ ततो मयोक्तं॥ स एवास्मत्प्रभुर्महाप्रतापोऽतिसमर्थश्च॥ अथाहं
तैः पक्षिभिर्धृत्वा कथमस्मद्भूमौ चरसीत्यभिधाय चित्रवर्णराज्ञः समीपं नीतः॥ ततो राज्ञः पुरो मा
मुपदर्श्य प्रणम्योक्तं॥ देवावधार्यतामेष दुष्टबकोऽस्मद्देशे चरन्नपि देवपादानधिक्षिपति॥ रा
जाह॥ कोऽयं कुतः समागतः॥ ते ऊचुः॥ राजहंसस्य हिरण्यगर्भस्यानुचरः कर्पूरद्वीपादागतः॥ अ
थाहं तन्मंत्रिणा गृध्रेण पृष्टः॥ कस्तत्र मुख्यो मंत्री॥ ततो मयोक्तं॥ सर्वज्ञनामा चक्रवाकः॥ गृध्रो

कं। युज्यते स्वदेशजो मे॥ यतः॥ स्वदेशजं कुलाचारविशुद्धं धाशुचिं। शास्त्रज्ञमव्यसनिनं व्यभिचारवि
हि॰उ वर्जितं॥१॥ अधीतव्यवहारांगं मौलं ख्यातं विपश्चितं। अर्थस्योत्पादकं सम्यग्विदध्यान्मंत्रिणां नृपः॥२॥
४ अत्रांतरे शुकेनोक्तं। कर्पूरद्वीपाद्योपि लघुद्वीपा जंबूद्वीपांतर्गता एव॥ तत्रापि देवपादानामेवाधि
४ त्य पत्यं॥ ततो राज्ञाप्युक्तं॥ एवमेतत्॥ यतः॥ राजा मत्तः शिशुश्चैव प्रमदा धनगर्वितः। अप्राप्यमपि वां
छंति किं पुनर्लभ्यते हि यत्॥१॥ ततो मयोक्तं॥ यदि वचनमात्रादेवाधिपत्यं सिध्यति तदा जंबूद्वीपेप्य
स्मत्प्रभोर्हिरण्यगर्भस्य स्वाम्यं॥ शुकेनोक्तं॥ कथमत्र निर्णयः॥ मयोक्तं॥ संग्राम॥ ततो राज्ञा विहस्याह।
स्वस्वामिनं गत्वा सज्जीकुरु॥ तदा मयोक्तं स्वदूतोपि प्रस्थाप्यतां॥ राजाह॥ कः प्रयातु दौत्ये॥ यत एवंभूतः स
दूतः कार्यः॥ भक्तो गुणी शुचिर्दक्षः प्रगल्भोऽव्यसनी क्षमी। ब्राह्मणः परमधर्मज्ञो दूतः स्यात्प्रतिज्ञान
वान्॥ सत्येवं भृत्या बहवः किंतु ब्राह्मण एव कर्तव्यः॥ यतः॥ प्रसादः कुरुते पत्युः संपत्तिं नाभिजाततां।
कालिमा कालकूटस्य नापैतीश्वरसंगमात्॥१॥ ततः शुक एव व्रजतु॥ शुक त्वमेवानेन सह तत्र गत्वा राम
अस्मदभिलषितं ब्रूहि॥ शुको ब्रूते॥ यथाज्ञापयति देवः॥ किंत्वयं दुर्जनो बकः तदनेन सह न गच्छामि॥ त ४
थाचोक्तं॥ खलः करोति दुर्वृत्तं नूनं फलति साधुषु॥ दशाननो हरत्सीतां बंधनं स्यान्महोदधेः॥१॥

अपि च॥ न स्थातव्यं न गंतव्यं दुर्जनेन समं क्वचित्। अस्त्युज्जयिनीवर्त्मप्रांतरे महान् पिप्पलवृक्षः॥
तत्र हंसकाकौ निवसतः। कदाचिद् ग्रीष्मसमये परिश्रांतः कश्चिदागत्य पांथस्तत्र तरुतले धनुःका
डं संनिधानेन निधाय छायायां सुप्तः। ततः क्षणांतरेण तन्मुखात् वृक्षछायापगता॥ अनंतरं सूर्य
तेजसा तन्मुखमभितप्तमवलोक्य कृपया तद्वृक्षस्थितेन हंसेन पक्षौ प्रसार्य पुनस्तत्र छाया क
ता॥ ततो निर्भरनिद्रासुखिना तेनाध्वन्येन मुखव्यादानं कृतं॥ तन्मुखे स काकः पुरीषोत्सर्गं
कृत्वा पलायितः॥ ततो यावदसावुत्थायोर्ध्वं निरीक्षयति तावत्तेनावलोकितो हंसः॥ अनेनैव मन्मुख
पुरीषोत्सर्गः कृत इति विचार्य सशरं धनुरारोप्य तेन पांथेन हंसो व्यापादितः॥ अतोऽहं ब्रवीमि। न
स्थातव्यमित्यादि॥ वर्तकस्यापि कथां कथयामि॥ शृणु॥ काको वृक्षशाखायां निवसति। वर्त
कश्चाधस्ताद्भूमौ निवसति। एवं तिष्ठतोस्तयोरेकदा सर्वपक्षिणो भगवतो गरुडस्य यात्राप्र
संगेन समुद्रतीरं चलिताः॥ ततः काकेन सह वर्तकश्चलितः। अथ गच्छतो गोपालस्य मस्तकाव
स्थितभांडाद्दधि वारं वारं काकेन खाद्यते। ततो यावदसौ दधिभांडं भूमौ धृत्वोर्ध्वं निरीक्षते तावत्काके
वर्तको दृष्टः॥ तेन खेटितः काकः पलायितः॥ वर्तकः स्वभावान्मंदगतिः प्राप्तो व्यापादितश्च॥

२
हि.उ.
५

अतोऽहं ब्रवीमि। न खादितव्यमित्यादि॥ अतोऽद्य शेषं वकस्तदनेन सह न गच्छामि। किंवा प्रथममेव व्र
जामि पश्चाद्वा व्रजिष्यामि। ततो मयोक्तं॥ अस्त्वेवं तथापि॥ दुर्जनेनोच्यमानानि संमतानि प्रिया
ण्यपि। अकालकुसुमानीव भयं संजनयंति मे॥१॥ दुर्जनस्त्वं भवतो वाग्व्यापारादेव प्रत्यक्षीकृ
तं॥ यतो नयो भूपालयोर्विग्रहे भवद्वचनं निदानं॥ पश्य॥ प्रत्यक्षेपि कृते दोषे मूर्खः सांत्वेन तु
ष्यति॥ रथकारो निजां भार्यां सजारां शिरसा वहत्॥१॥ राजोवाच॥ कथमेतत्॥ शुकः कथ
यति॥ अस्ति यौवनश्री नगरे मंदमतिर्नाम रथकारः॥ स किंवदंत्या स्वभार्यां बंधकीं जानाति परंतु
जारेण समं चक्षुषैकस्थाने न पश्यति। ततोऽसौ रथकारो भार्यामुक्तवान्। अहं राजाज्ञया चैव षट् दिन
प्राप्यं ग्रामांतरं गमिष्यामीत्युक्त्वा प्रचलितः सन् कियद्दूरं गत्वा पुनरागत्य प्रदोषसमये स्वगृहे ख
ट्वातल्ले पतित्वा स्थितः॥ अथ रथकारो ग्रामांतरं गत इत्युपजातविश्वासया तया स जारः संध्यायामेवा
हूतः॥ पश्चात्तेन समं तस्यां खट्वायां निर्भरं क्रीडंती खट्वातले स्थितेन तेन सह भर्त्रा किंचिदंगस्पर्शात्स्वा राम ५
मिनं विज्ञाय सापि विषण्णाभवत्। ततो जारेणोक्तं॥ किमिति त्वं मया सह अद्य निर्भरं न रमसे विस्मितेव प्र
तिभासि। ततस्तयोक्तं॥ योसौ मम प्राणेश्वरः सोद्य ग्रामांतरं गतस्तेन सकलजनपूर्णोप्ययं ग्रामो मां

प्रत्यरण्यवत्। जारो ब्रूते॥ तत्किमेवंविधः स्नेहभूमिः स ते कलहकारकः॥ बंधकी ब्रवीति॥ बर्बर
किं ब्रवीषि। शृणु। परुषाण्यपि चोक्ता या दृष्टा या क्रुद्धचक्षुषा। सुप्रसन्नमुखी भर्तुः सा नारी धर्मभा
जनं॥ अपि च॥ नगरस्थो वनस्थो वा पापो वा यदि वाऽशुचिः॥ यासां स्त्रीणां प्रियो भर्ता तासां लोका महो
दयाः॥१॥ अन्यच्च॥ भर्ता हि परमं नार्या भूषणं भूषणैर्विना। एषा विरहिता तेन शोभनापि न शोभते।
२॥ त्वं जारो लम्पटमनो लौल्यात्पुष्पतांबूलसदृशः कदाचित्सेव्यसे॥ स च मे स्वामी मां विक्रेतुं देवेभ्यो
ब्राह्मणेभ्यो दातुं समर्थः॥ किं बहुना॥ तस्मिन्जीवति जीवामि तन्मरणे चानुमरणं करिष्यामि
इत्येष मे निश्चयः॥ यतः॥ तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे। तावत्कालं वसेत्स्वर्गे
भर्तारं यानुगच्छति॥१॥ अन्यच्च॥ व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्॥ तद्वद्भर्तारमादाय
तेनैव सह मोदते॥२॥ यस्मै दद्यात्पिता चैनां भ्राता वाऽनुमते पितुः। तं शुश्रूषेत जीवंतं संस्थितं न
व्यलंघयेत्॥३॥ एतत्सर्वं श्रुत्वा स रथकारोऽचिंतयत्॥ धन्योऽहं यस्येदृशी सहजस्नेहवत्सला प्रिय
विनी भार्येति मनसि निधाय तां खट्वां स्त्रीपुरुषसहितां मूर्ध्नि कृत्वा नर्तितवान्॥ अतोऽहं ब्रवीमि॥
प्रत्यक्षेपि कृते दोष इत्यादि॥ ततोऽहं तेन राज्ञा यथाव्यवहारेण संपूज्य प्रस्थापितः। शुकोपि मलय

३
हि॰ उ॰
६

श्वारागच्छन्नास्ते। एतत्सर्वं ज्ञात्वा यथाकर्त्तव्यमनुष्ठीयतां। अत्रांतरे चक्रवाको विहस्याह॥ व
केन तावद्देशांतरमपि गत्वा यथाशक्ति राजकार्यमनुष्ठितं॥ किंतु देव स्वभाव एव:॥ यत:॥ श
तं दद्यान्न विवदेदिति सुज्ञस्य संमतं॥ विना हेतुमपि द्वंद्वं तस्मान्मूर्खस्य लक्षणं॥१॥ राजा
ह॥ अलमनेनातीतोपालंभेन प्रस्तुतमनुसंधीयतां॥ चक्रो ब्रूते॥ देव विजने ब्रवीमि॥ यत:॥
वर्णाकारप्रतिध्वाननेत्रवक्त्रविकारत:॥ अप्यूहंति मनो धीरास्तस्माद्रहसि मंत्रयेत्॥१॥ राजा मं
त्री च तत्र स्थितौ॥ अन्ये चान्यत्र गता:॥ चक्रवाको वदति॥ देव। अहमेवं जानामि॥ कस्याप्यस्मन्नि
योगिन: प्रेरणया बकेनेदमनुष्ठितं॥ यत॥ वैद्यानामातुर: श्रेयान् व्यसनी यो नियोगिनां॥
विदुषां जीवनं मूर्ख: सद्वंद्वो नृपतेर्जन:॥१॥ राजा ब्रवीति॥ भवतु कारणमत्र निरूपणीयं॥ सं
प्रति यत्कर्त्तव्यं तद्ब्रूत॥ चक्रो ब्रूते॥ देव॥ प्रणिधिस्तावत्तत्र यातु॥ ततस्तदनुष्ठानं बलाबलं च जा
नीम:॥ तथाहि॥ भवेत्स्वपरराष्ट्राणां कार्याकार्यावलोकने॥ चारश्चक्षुर्महीभर्त्तुर्यस्य नास्त्यंध राम
एव स:॥१॥ स च द्वितीयं विश्वासपात्रं गृहीत्वा यातु॥ तेनासौ स्वयं तत्रावस्थाय द्वितीयं मंत्रं ६
कार्यं सुनिभृतं सम्यग्निश्चित्य प्रस्थापयति॥ तथा चोक्तं॥ तीर्थाश्रमे सुरस्थाने शास्त्रविज्ञानहेतुना॥

तपस्विव्यंजनोपेतै: स्वचरै: सह संवदेत्॥२॥ गूढचरश्च जले स्थले यो विचरत्यसावुभयचेतनो
न्य: कश्चिद्बक एव नियुज्यतां॥ तथाह्येको बक राज्ञ: कुले तिष्ठतु। देवपादैस्तदपि सुगुप्तमनुष्ठात
व्यं॥ यत:॥ षट्कर्णो भिद्यते मंत्रस्तथा प्राप्तश्च वार्त्तया। इत्यात्मना द्वितीयेन मंत्र: कार्यो महीभुजा॥
१॥ अपरंच ॥यो यत्र स्य॥ मंत्रभेदेपि ये दोषा भवंति पृथिवीपते:॥ न शक्यास्ते समाधातुमि
ति नीतिविदां मतं॥ तं १॥ राजा विमृश्याह॥ प्राप्तस्तावन्मयोत्तम: प्रणिधि:॥ मंत्री ब्रूते॥ देव॥
तदा संग्रामे जयोपि प्रा प्त एव। अत्रांतरे प्रतीहार: प्रविश्य प्रणम्योवाच॥ देव। जंबूद्वीपादाग
त: शुको द्वारि तिष्ठति॥ राजा चक्रवाकमवलोकते। अत्रांतरे किमुचितं॥ चक्रवाकेनोक्तं तावदसौ
गत्वा भवतु तावत् पश्चाद्द्रष्टव्य:॥ प्रतीहारो गत:॥ राजाह॥ विग्रहस्तावदागत्य पस्थित:॥ चक्रो
ब्रूते॥ देव तथापि विग्रहो न विधि:॥ यत:॥ स चिव: किं स मंत्री वा य आदावेव भूपतिं॥ युद्धो
द्योगं स्वभूत्यागं निर्दिशत्यविचारितं॥१॥ अपिच॥ विजेतुं प्रयतेतारीन्न युद्धेन कदाचन॥ अ
नित्यो विजयो यस्माद्दृश्यते युध्यमानयो:॥२॥ यत:॥ सर्व एव जन: शूरो नासादितसमिद्रस:॥
अदृष्टपरसामर्थ्य: सदर्प: को भवेन्न हि॥३॥ किंच॥ न तथोत्थाप्यते ग्रावा प्राणिभिर्दारुणा यथा

हि.उ.
७

अन्योपायान्महासिद्धिरेतन्मंत्रफलंमहत् ॥४॥ किंतुविग्रहमुपस्थितंविलोकव्यवह्रियतां॥
॥यतः॥ यथाकालकृताद्यन्तात्कृषिःफलवतीभवेत्। तद्वन्नीतिरियंदेवचिरात्फलतिन
क्षणात्॥५॥ अपरंच॥ महतोदूरभीरुत्वमासन्नेशूरतागुणाः। विपत्तौहिमहाल्लोकोधीरताम न
धिगछति॥ अन्यच्च॥ प्रत्यूहःसर्वसिद्धीनामुत्तापःप्रथमःकिल॥ अतीशीतलमप्यंभःकिं
भिनत्तिनभूभृतः॥६॥ विशेषतश्च॥ देवमहाबलोसौचित्रवर्णोराजा। बलिनासहयो
द्धव्यमितिनास्तिनिदर्शनं॥ तद्युद्धंहस्तिनासार्द्धंनराणांपादयुद्धवत्॥७॥ समूलःकालम
प्राप्यैवोपकर्त्तरिवर्त्ते ते॥ कृतिर्वलवतासार्द्धंकीटपक्षोद्गमोपम॥८॥ कौर्मसंकोचमा
स्थायप्रहारमपि मर्षयेत्॥ प्राप्तकालेचनीतिज्ञउत्तिष्ठेत्क्रूरसर्पवत्॥९॥ शृणु॥
महत्यल्पेप्यु पायज्ञःसमयेचभवेत्क्षमः॥ समुन्मूलयितुंवृक्षान्तृणानीवनदी राम
रयः॥१०॥ अतस्तद्दूतोयंशुकोत्राश्वास्यधियतां यावद्दुर्गसज्जीक्रियते॥ यतः॥ एकःशतं
योधयतिप्राकारस्थोधनुर्द्धरः। शतंशतसहस्राणितस्माद्दुर्गंविशिष्यते॥११॥ किंच॥ अदुर्गविषयः
कस्यनारेःपरिभवास्पदं॥ अदुर्गोनाश्रयोराजापोतच्युतमनुष्यवत्॥१२॥ दुर्गंकुर्यान्महाखा

तमुच्चप्राकारसंयुतं॥ सयंत्रंसजलंशैलसरिन्मरुवनाश्रयं।१३॥ विस्तीर्णतातिवैषम्यंरसधा
न्येधनसंग्रहः। प्रवेशश्चापसारश्चसप्तैतादुर्गसंपदः॥१४॥ राजाह॥ दुर्गानुसंधानेक्कोनियुज्य
तां॥ चक्रोब्रूते॥ योयत्रकुशलःकार्येतंतत्रविनियोजयेत्॥ कर्मविकर्मकर्त्तायःशास्त्रज्ञोपिनमु
ह्यति॥१५॥ तदाहूयतांसारसः। तथानुष्ठिते।सारसंसमागतमाश्वास्यराजोवाच॥ सारसत्वंदुर्गम
नुसंधेहि। सारसःप्रणम्योवाच॥ देव॥ दुर्गंतावदिदमेवचिरात्सुनिरूपितमास्तेसमहत्सरः। किंते
न्मध्यवर्त्तिनिद्वीपेसंग्रहःकार्यः॥ यतः॥ धान्यानांसंग्रहोराजन्नुत्तमःसर्वसंग्रहात्। निक्षिप्तो
पिमुखेरत्नंनकुर्यात्प्राणधारणं॥१६॥ ख्यातःसर्वरसानांहिलवणोरसउत्तमः। गृह्णीयात्तुविना
तेनव्यंजनंगोमयायते॥१७॥ सत्वरंगत्वातथानुष्ठीयतां। ततःसारसेनगत्वादुर्गसंस्थानंसज्जी
कृते॥ अनंतरंप्रविश्यप्रतीहारोब्रूते॥ देवसिंहलद्वीपादागतोमेघवर्णोनामवायसराजःसपरि
वारःप्रणमतिदेवपादांश्चद्रष्टुमिछति।राजाह॥ काकःपुनःसर्वज्ञोवहुदृश्वाचभवति।तद्भवतु
संग्राह्यः॥ चक्रउवाच॥ देवास्त्येवं।किंतुकाकःस्थलेचरस्तेनास्मद्विपक्षपक्षेनिक्षिप्तस्तत्कथं
संगृह्यते॥ तथाचोक्तं॥ आत्मपरित्यागात्परपक्षेषुयोरतः। सपरैर्हन्यतेमूढोनीलवर्णशृगाल
पत्र१

वत॥१॥ राजोवाच॥ कथमेतत्॥ चक्रोऽब्रवीत्॥ अस्ति कांचनपुरे नीलीकारस्य भांडं गोपुरे सं
निहितं॥ तत्र च कदंबाद्दष्टो रजन्यां कश्चिच्छृगालस्तस्मिन्भांडे निपतितः। पश्चात्तत उत्थातुम
समर्थः प्रातरात्मानं मृतवत्संदर्श्य स्थितः॥ ततोसौ नीलभांडादुत्थाप्य स्वामिना पुच्छे धृत्वा ग्रा
माद्बहिर्निक्षिप्तः॥ ततोसौ यावद्दूरं गतस्तमवलोक्य शृगालः प्रपलाय्य वनं जगाम॥ गत्वा चा
त्मानं नीलवर्णमवलोक्य चिंतयत्॥ अहमिदानीमुत्तमवर्णस्तदात्मोत्कर्षं किं न साधयामि॥
इत्यालोच्य शृगालानाहूय तेनोक्तं॥ अहं भगवत्या वनदेवतया निजहस्तेनारण्यराज्ये सर्वौषधीनां
रसेनाभिषिक्तः॥ पश्यत मम वर्णं॥ तदद्यारभ्यास्मदाज्ञयास्मिन्नरण्ये व्यवहारः कार्यः॥ शृगालाश्च तं
विशिष्टवर्णमवलोक्य साष्टांगपातं प्रणम्योचुः॥ यथाज्ञापयति देव इति॥ अनेनैव क्रमेण सर्वेष्वप्यर
ण्यवासिष्वाधिपत्यं॥ ततस्तेन स्वज्ञातिभिरावृतेनाधिक्यं साधितं। ततस्तेन व्याघ्रसिंहादीनुत्तम
परिजनान्प्राप्य शृगालानवलोक्य लज्जमानेनावज्ञया दूरीकृताः स्वज्ञातयः॥ ततो विषण्णान् शृ
गालानवलोक्य वृद्धशृगालेन प्रतिज्ञातं॥ मा विषीदत॥ यदनेनानीतिज्ञेन वयं मर्मज्ञाः परिभूता
स्तद्यथायं नश्यति तन्मया विधेयं। यतोऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजा

नमिमं मन्यंते॥ तद्यथायं परिचीयते तत्कुरुत। तत्र चैवमनुष्ठेयं। यत्सर्वे यूयं संध्यासम
ये तत्संनिधाने महारावमेकदा करिष्यथ॥ ततस्तं शब्दमाकर्ण्य स्वभावात्तेनापि शब्दः कर्त्त
व्यः॥ यतः॥ यः स्वभावो हि यस्य स्यात्तस्यासौ दुरतिक्रमः॥ श्वा यदि क्रियते राजा तत्किं ना
श्नात्युपानहं॥१॥ ततः शब्दादभिज्ञाय स व्याघ्रेण हंतव्यः॥ तथानुष्ठिते तद्वृत्तं॥ तथा चो
क्तं॥ छिद्रं मर्म च वीर्यं च सर्वं वेत्ति निजो रिपुः॥ दहत्यंतर्गतश्चैव शुष्कं वृक्षमिवानलः॥
२॥ अतोहं ब्रवीमि॥ आत्मपक्षपरित्यागादित्यादि॥ राजाह॥ यद्येवं तथापि दृश्यतां॥ ता
वदयं दूरादागतस्तत्संग्रहे विचारः। चक्रो ब्रूते॥ भवतु भवतो भिमतं चेत्प्रणिधिः प्रहितः
दुर्गं च सज्जीकृतं। शुकोप्यालोक्य प्रस्थाप्यतां। किंतु॥ नंदं जघान चाणक्यस्तीक्ष्णदूतप्रयो
गतः॥ तद्दूतांतरितं दूतं पश्येद्धीरसमन्वितः॥१॥ ततः सभां कृत्वा समाहूतः शुकः काकोपि॥
शुकेनाशीर्वादो दत्तः काकेन प्रणामः कृतः शुकः किंचिदुन्नतशिरा अत्रासने उपवि
श्य ब्रूते॥ भो हिरण्यगर्भ त्वां राजाधिराजः श्रीमच्चित्रवर्णः समाज्ञापयति॥ यदि जीविते

३

हि.उ. नक्रियावाप्रयोजनमस्तितदासत्वरमुपगम्यास्मच्चरणयोः प्रणामंकुरु॥ नोचेद्युद्धेनप्रयो
९ जनमस्तितदायुद्धमपिकुरु॥ अथवास्मान्प्रति तेस्थानेंचिंतय॥ राजाजासकोपंब्रूते॥ अ
कोप्यस्माकंनास्ति॥ उत्थायमेघवर्णोब्रूते॥ देव॥ समाज्ञापय॥ हन्मिदुष्टंशुकं॥ सर्वज्ञोरा
जानंकाकंचसांत्वयन्ब्रूते॥ शृणुतावत्॥ नसासभायत्रनसंतिवृद्धावृद्धानतेनयेनवदं
तिधर्मं। धर्मःसनोयत्रनसत्यमस्तिसत्यंनतद्यच्छलमभ्युपैति॥ यतोधर्मश्चैषः॥ दूतोम्ले
छोप्यवध्यःस्याद्राजाहंसमुखोयतः। उद्यतेष्वपिशस्त्रेषुदूतोवदतिनान्यथा॥ किंपुनर्द्विजः॥१॥ स्वापक
र्षंपरोत्कर्षंदूतोक्तैर्मन्यतेतुयः॥ सदैवावध्यभावेनदूतःसर्वंहिजल्पति॥ २॥ ततोराजाका
कश्चप्रकृतिमापन्नः॥ शुकउत्थायचलितः॥ पश्चाच्चक्रवाकेनप्रबोध्यानीयकनकालंका
रादिकंदत्वासंप्रेषितोययौ॥ शुकोविंध्याचलंगत्वाराजानंप्रणतवान्॥ चित्रवर्णोराजाह॥ शु राम ९
ककथयकावार्त्ताकीदृशोसौदेशः। राजाच॥ शुकोवदति॥ देवसंक्षेपादियंवार्त्ता॥ युद्धोद्योगः
क्रियतां॥ देशश्चासौकर्पूरद्वीपःस्वर्गैकदेशःकथंवर्णयितुंशक्यते॥ राजाहंसश्चयुधिष्ठिर

सं२

समोस्ति॥ ततस्तद्वचनाद्राजासर्वान्सचिवानाहूयमंत्रयितुमुपविष्टः॥ संप्रतिविग्रहेयथा
कर्त्तव्योपदेशंब्रूत॥ विग्रहःपुनरवश्यंकर्त्तव्यः॥ तथाचोक्तं॥ असंतुष्टाद्विजानष्टाःसंतुष्टश्च
महीपतिः। सलज्जागणिकानष्टानिर्लज्जाश्चकुलांगना॥ दूरदर्शीनामगृध्रोब्रूते॥ देवव्य
सनितयाविग्रहोनविधिः। मित्रामात्यसहायाश्चयदास्युर्दृढभक्तयः॥ शत्रूणांविपरीताश्च
कर्त्तव्योविग्रहस्तदा॥ राजा॥ ममबलानितावदवलोकयतुमंत्री॥ तदेतेषामुपयोगः॥ किं
वर्त्तनरानंदातव्यमेव। तदाहूयतांमौहूर्त्तिकः। शुभलग्नंयात्रार्थंददातु॥ मंत्रीवदति॥
तथापिसहसायात्राकरणमनुचितं। विशंतिसहसाम्रूढाअविचार्यद्विषद्बलं॥ खड्गधारा
परिष्वंगंलभंतेहतानिश्चयाः। राजोवाच॥ मंत्रिन्ममोत्साहभंगंसर्वथामाकृथाः॥ वि
जिगीषुर्यथापरभूमिमाक्रामतितत्कथय। गृध्रोब्रवीति॥ तत्कथयामिश्रूयतां॥ तत्कथयामि
श्रूयतां। किंतु॥ किंमंत्रिणामनुष्ठानेशास्त्रवत्पृथिवीपतेः॥ नाप्यौषधंपरिज्ञानाद्व्याधेःशांतिःक्व
चित्भवेत्॥ १॥ राजासखाचनातिक्रमणीयमितियथाश्रुतंतंनिवेदयामि। शृणुदेव॥ नद्यद्रि

वनदुर्गेषुयत्रयत्रभयंनृप॥तत्रतत्रचसेनानीर्यायाद्व्यूहकृतैर्बलैः॥२॥बलाध्यक्षःपुरोयायात्
प्रवीरपुरुषान्वितः॥मध्येकलत्रंस्वामीचकोषःफल्गुचयद्बलं॥३॥पार्श्वयोरुभयोरश्वाअश्वा
नांपार्श्वयोरथाः।रथानांपार्श्वयोर्नागानागानांचपदातयः॥४॥पश्चात्सेनापतिर्यायात्खि
न्नानाश्वासयन्शनैः॥मंत्रिभिःसुभटैर्युक्तःप्रतिगृह्यबलंनृपः॥५॥समेयाद्विषमंनागैर्ज
लाढ्यंचमहावनं।सममश्वैर्जलंनौभिःसर्वत्रैवपदातिभिः॥६॥हस्तिनागमनंप्रोक्तंप्रशस्तंज
लदागमे॥तदन्यत्रतुरंगाणांपत्तीनांसर्वदैवहि॥७॥शैलेषुदुर्गमार्गेषुविधेयंनृपरक्षणं॥सु
योधैरक्षितस्यापिस्वपनंयोगनिद्रया॥८॥नाशयेत्कर्षयेच्छत्रून्दुर्गकंटकमर्दनैः॥परदे
शप्रवेशेचकुर्यादाटविकान्पुरः॥९॥यत्रराजातत्रकोषोविनाकोषंनराजता॥सुभटेभ्यस्ततोद
द्यात्कोहिदातुर्नयुध्यते॥१०॥यतः॥ननरस्यनरोदासःकिंत्वर्थस्यभूपते॥गौरवंलाघवंचा
पिधनाधननिबंधनं॥११॥अभेदेनचयुध्येतरक्षेयुश्चपरस्परं।फल्गुभांडंचयत्किंचिन्मध्येव्यू
हस्यकारयेत॥१२॥पदातींश्चमहीपालःपुरोनीकस्ययोजयेत॥उपरुध्यारिमासीतराष्ट्रंचास्योपपी

डयेत॥१३॥स्यंदनाश्वैःसमेयुध्येदनूपेनौद्विपैस्तथा॥वृक्षगुल्मावृतेचापैरसिचर्मायुधैःस्थले॥
१४॥दूषयेच्चास्यसततंयवसान्नोदकेंधनं॥भिंद्याच्चैवतडागानिप्राकारान्परिखास्तथा॥१५॥
बलेषुप्रमुखोहस्तीनतथान्योमहीपते॥निजैरवयवैरेवमातंगोष्टायुधःस्मृतः॥१६॥बलमश्व
श्चसैन्यानांप्राकारोजंगमोयतः॥तस्मादश्वाधिकोराजाविजयीस्थलविग्रहे॥तथाचोक्तं॥युध्य
मानाहयारूढादेवानामपिदुर्जयाः॥अपिदूरस्थितास्तेषांवैरिणोहस्तवर्तिनः॥१८॥विशेषतश्च
धनुर्धराः।यतः॥धन्वीचेत्तुरगारूढोजयत्येकोपिमेदिनीं।अनलानिलसंयोगोधन्विनस्तुर
गस्यच॥१९॥प्रथमंयुद्धकारित्वंसमस्तबलपालनं।दिङ्मार्गाणांविशोधित्वंपत्तिकर्मप्रचक्षते॥२०॥
स्वभावशूरमस्त्रज्ञमविरक्तंजितश्रमं॥प्रसिद्धक्षत्रियप्रायंबलंश्रेष्ठतमंविदुः॥२१॥यथाप्रभुकै
कृतान्मानाद्युध्यंतेभुविमानवाः॥नतथावहुदत्तेनद्रविणेनापिभूपते॥२२॥वरमल्पबलंसारंनब
ह्वीमुंडमुंडली।कुर्यादसारभंगोहिसारभंगमपिस्फुटं॥२३॥अप्रसादोनधिष्ठानंदेयांशहरणं
चयत्॥कालयापोप्रतीकारस्तद्वैराग्यकारणं॥२४॥अपीडयन्बलंशत्रून्जिगीषुरभिषेणयेत्॥
सुखसाध्यंद्विषांसैन्यंदीर्घप्रयाणपीडितं॥२५॥दायादादपरोयस्माद्भुवेनाकर्षणोद्विषां।तदुत्था
पयेत्तेयत्नाद्दायादंतस्यविद्विषः॥२६॥संधाययुवराजेनयदिवामुख्यमंत्रिणा।अंतःप्रकोपणंकु

३

नो३

हि॰ ३ र्यमभियोक्तुः स्थिरात्मनः ॥२७॥ हस्त्यश्वमित्रबलं चापि भोगं दत्वाभिघातयेत् ॥ अथवा गोग्रहात्कृष्टा
तेष्वज्ञमिति बंधनात् ॥२८॥ स्वराष्ट्रं वासयेद्राजा परदेशोपवाहनात् । अथवा दानमानाभ्यां वासि
११ तं धनदं हितं ॥२९॥ राजाह ॥ आः किं बहुदितेन । आत्मोदयः पराज्यानि द्वयं नीतिरितीयती । तदूरी
कृत्य कृतिभिर्वाचस्पत्यं प्रजायते ॥१॥ विहस्य च ॥ उच्यते सर्वमेतत् ॥ अन्यदुच्छृंखलं सत्वमन्य किंतु ॥४
च्छास्त्रनियंत्रितं ॥ सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥१॥ ततो उत्थाय राजा मौहूर्तिकनि
वेदितलग्ने प्रस्थितः ॥ अथ प्रणिधिप्रहितश्चरो हिरण्यगर्भस्य समीपमागत्य साष्टांगपातं प्र
णम्योवाच ॥ देव समागतप्रायो राजा चित्रवर्णः । संप्रति मलयपर्वतोपत्यकायां समावासितो वर्त्त
ते ॥ दुर्गशोधनं च प्रतिक्षणमनुसंधातव्यं । यतोयं गृध्रो महामंत्री । किंच ॥ एतस्य विश्वासकथा
प्रसंगे सत्येतदिंगितमवगतं यदनेन कोप्यस्मद्दुर्गे प्रागेव निक्षिप्तः ॥ चक्रो ब्रूते ॥ देव काक एवासौ
संभवति ॥ राजाह न कदाचिदेतत् ॥ यद्ययं तदा कथं तेन शुकस्याभिभवोद्योगः कृतः ॥ अपरं च ॥
शुकस्यागमनात्तस्य विग्रहोत्साहः । सुचिरादत्रास्ते ॥ मंत्री ब्रूते ॥ तथाप्यागंतुः शंकनीयः ॥ रा
हा ॥ आगंतवोऽपि प्रत्युपकारका दृश्यंते क्वचित् ॥ शृणु ॥ परोऽपि हितवान्बंधुर्बंधुरप्यहितः परः ॥ अ राम
हितो देहजो व्याधिर्हितमारण्यमौषधं ॥१॥ अपरं च ॥ आसीद्वीरवरो नाम शूद्रकस्य महीभुजः ॥ ११

सेवकः स्वल्पकालेन स ददौ सुतमात्मनः ॥२॥ चक्रः पृच्छति ॥ कथमेतत् ॥ राजा कथयति ॥ अहं पु
पुरा शूद्रकस्य राज्ञः क्रीडासरसि कर्पूरकेलिनाम्नो राजहंसस्य पुत्र्या कर्पूरमंजर्या सममनुराग
वानभवं । तत्र वीरवरो नाम राजपुत्रः सपुत्रस्त्रीकः कुतश्चिद्देशादागत्य शूद्रकस्य राज्ञो द्वारि प्रती
हारमुपगम्योवाच ॥ अहं राजपुत्रो वर्त्तनार्थी मां राजदर्शनं कारय ॥ ततो द्वारपालेन शूद्रकस्य रा
ज्ञः समीपं गत्वाभिहितं । देव राजपुत्रो वीरवरो नाम खड्गहस्तो वर्त्तनार्थी देवपादान्द्रष्टुमिच्छति ॥
राज्ञोक्तं समाहूयतां ॥ ततः प्रतीहारप्रेषितः प्रणामं कृत्वा वीरवरः समुपविष्टः ॥ राज्ञोक्तं ॥ कि
यत्ते वर्त्तनं ॥ वीरवरो ब्रूते ॥ प्रत्यहं टंकाशतचतुष्टयं ॥ राजाह ॥ का ते सामग्री ॥ वीरवरो वदत् ॥ द्वौ बाहू तृ
तीयः खड्गः ॥ राजाह ॥ नैतच्छक्यं ॥ एतच्छ्रुत्वा वीरवरः प्रणम्य चलितः ॥ अथ मंत्रिभिरुक्तं । देव दिन
चतुष्टयस्य वर्त्तनं दत्वा ज्ञायतामस्य स्वरूपं किमुपयुक्तोयमेतावद्वर्त्तनं गृह्णात्युतानुपयोगी वा ॥
तद्वचनादाहूय वीरवराय तांबूलं दत्वा टंकाशतचतुष्टयमपि दत्तं ॥ तद्विनियोगश्च राज्ञा सु
निभृतं निरूपितः ॥ तदर्द्धं देवेभ्यो ब्राह्मणेभ्यश्च संप्रदत्तं ॥ अपरमर्द्धमतिथि॰ भ्यो॰ वशिष्टं

सत्पुत्रस्त्रीकशरीरभोग्यायतांबूलचंदनकर्पूरकस्तूरिकापुष्पसुवर्णवस्त्रादिव्य येनव्ययितमे
तत्सर्वं नित्यकृत्यं कृत्वा राजद्वारमहर्निशं सखड्गपाणिः सेवसते॥ ततो राज्ञः प्राप्तविदायः स्वगृहं
याति॥ एवं तिष्ठत्येकदा चतुर्दश्यां महीराजो मंदिरस्थितेन जाग्रता राजा शोकस्यापि करुणाक्रंदितंश्रु
तं श्रुत्वा सेवके क्षिप्तमुक्तं। द्वारिकस्तिष्ठति॥ तेनोक्तं॥ देवाहं वीरवरः राजोक्तं॥ गः॥ क्रंदनानुसरणं
क्रियतां॥ यथाज्ञापयति देव इत्युक्त्वा प्रचलितः॥ राजा चिंतितं नेदमुचितं॥ अयमेकाकी राजपुत्रो
मया सूचिभेद्ये तमसि प्रेषितस्तदहमपि गत्वा निरूपयामि किमेतदिति॥ राजापि खड्गमादाय तद राज
नुसरणक्रमेण नगराद्बहिर्निर्जगाम गत्वा च वीरवरेण सा रुदती स्त्री रूपयौवनसंपन्ना सर्वालं १२
कारभूषिता वलोकिता पृष्टा च॥ का त्वं किमर्थं रोदिषीति। स्त्रियोक्तं॥ अहमेतस्य राज्ञो लक्ष्मीश्चिरा
देतस्य भुजच्छायायां विश्रांता॥ इदानीं गमिष्यामि। वीरवरेणोक्तं॥ भो देवि केनापि प्रकारेण पुनरिहा
वलंबनं स्याद्भगवत्याः॥ लक्ष्मीरुवाच॥ यदि त्वमात्मनः पुत्रं शक्तिवरं द्वात्रिंशल्लक्षणोपेतं भगवत्याः
सर्वमंगलाया उपहारीकरोषि तदा पुनरत्राहं सुचिरं निवसामीत्युक्त्वाऽदृश्याभवत्॥ ततो वीरवरेणा

स्वगृहं गत्वा निद्राणा वधूः प्रबोधिता पुत्रश्च॥ तौ प्रति वीरवरस्तदखिलं वृत्तांतमुक्तवान्॥ तच्छ्रु
सानंदं शक्तिवरो ब्रूते॥ धन्योहमेवं भूतो यस्य स्वामिराज्यरक्षायामुपयोगः॥ ततः कोधुना विलंब
हेतुः॥ यतः॥ धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्॥ तन्निमित्तं वरं त्यागो विनाशे नियते सति॥
१॥ शक्तिवरस्य मातोवाच॥ यद्येतन्न कर्तव्यं तत्केनान्येन कर्मणाऽमुष्य महावर्त्तनस्य निःक्रयो
भविष्यतीत्यालोच्य सर्वे सर्वमंगलायतनं गताः॥ तत्र सर्वमंगलां संपूज्य वीरवरो ब्रूते॥ देवि प्र
सीद विजयतां शूद्रको नाम महाराजो गृह्यतां मयमुपहार इत्युक्त्वा खड्गेन पुत्रस्य शिरश्छि
च्छेद॥ ततोऽचिंतयत्॥ अधुनाऽनिःपुत्रस्य जीवनं व्यर्थमित्यालोच्यात्मनः शिरश्छिन्नवान्॥ ततः
स्वामिनः पुत्रस्य च शोकार्त्तया स्त्रियापि तदनुष्ठितं॥ तत्सर्वं दृष्ट्वा स राजा साश्चर्यं चिंतयामास॥ जीवं
ति म्रियंते च मद्विधाः क्षुद्रजंतवः॥ अनेन सदृशो लोके न भूतो न भविष्यति॥१॥ तदेतेन राज्येन
नप्रयोजनं। ततः स्वशिरः छेत्तुमुल्लासितः खड्गः केनापि रुद्धः॥ अथ भगवत्या सर्वमंगलयोक्तं॥
अलं पुत्र साहसेन॥ इदानीं राज्यभंगो नास्ति॥ राजा साष्टांगपातं प्रणम्योवाच॥ देवि न मे राज्येन

३

हि॰उ॰ जीवितेन वा प्रयोजनमस्ति ॥ यदि मय्यनुकंपास्ति तदा मदायुषाप्ययं सदारपुत्रो जीवतु ॥ अहं
पुनर्यथाप्राप्तां गतिं गमिष्यामि ॥ भगवत्योक्तं ॥ अनेन तव सत्वोत्कर्षेण भृत्यवात्सल्येन च सर्वथा
१२ संतुष्टास्मि गच्छ विजयी भव ॥ अयमपि सपरिवारो राजपुत्रो जीवतु । तच्छ्रुत्वा दृष्टो राजा तैरलक्षितः ।
स्वमंदिरं गत्वा तथैव सुप्तः स्थितः ॥ वीरवरोपि स्त्रीपुत्रौ गृहे प्रेष्य राजकुलमागत्य तथैवस्थितः ॥ त
तो राजा पृष्टः ॥ वीरवर वि[illegible]चारितं रोदनकारणं । स ब्रूते ॥ सा रुदती स्त्री मयावलोकिता ऽदृश्याभव
त् ॥ तद्वचनमाकर्ण्य संतुष्टो राजा ऽचिंतयत् ॥ कथमयं श्लाघ्यो महासत्वः ॥ यतः ॥ प्रियं ब्रूयादकृप
णः शूरः स्यादविकत्थनः । दाता चेत्पात्रवर्षी स्यात्प्रगल्भः स्यादनिष्ठुरः ॥ १ ॥ एतन्महापुरुषलक्षण
मेतस्मिन्सर्वमस्ति ॥ ततः स राजा प्रातः शिष्टसभायां तद्वृत्तांतं सर्वं प्रस्तुत्य प्रसादात्तस्य कर्णाटदेशरा
ज्यं ददौ ॥ तत्किमागंतुका जातिमात्रेण दुष्टास्तत्राप्युत्तममध्यमाधमाः संभवंति । चक्री ब्रूते ॥ योऽका राम
र्यं कार्यवच्छास्ति स किं मंत्री नृपेच्छया ॥ वरं स्वामिमनोदुःखं तन्नाशो न त्वकार्यतः ॥ १ ॥ शृणु देव ॥ १२
पुराणल्लब्धं यदेकेन तन्ममापि भविष्यति ॥ हत्वा भिक्षुं यतो मोहान्निध्यर्थी नापितो हतः ॥ २ ॥ राजा १३

पृच्छति ॥ कथमेतत् ॥ चक्री कथयति ॥ अस्त्ययोध्यायां पुरि चूडामणिर्नाम क्षत्रियः ।
तेन महता कायक्लेशेन भगवान् चंद्रार्द्धचूडामणिश्चिरमाराधितः । ततः प्रक्षीणपापोसौ स्व
प्ने दर्शनं दत्वा भगवतः प्रसादाद्यक्षेश्वरेणादिष्टः ॥ यत्त्वमद्य प्रातः क्षौरं कृत्वा लकुटहस्तः
सन् गृहे द्वारि निभृतं स्थास्यसि ततो यमेवागतं भिक्षुमंगणे पश्यसि तं निर्दयं लगुडेन ह
निष्यसि ॥ ततोसौ भिक्षुः सुवर्णपूर्णः कलशो भविष्यति ॥ तेन त्वया यावज्जीवं सुखिना भ
वितव्यमिति ॥ अनंतरं तथानुष्ठिते तद्वृत्तं । तस्य क्षौरकरणायानीतेन नापितेनालोक्यालोचितं ॥
अहो निधिप्राप्तेरयमुपायस्तदहमप्येवं किं न करोमि ॥ ततः प्रभृति स नापितः प्रतिदिनं तथा
विधो लकुटहस्तः प्रातः सुनिभृतं भिक्षोरागमनमपेक्षते ॥ एकदा तेन प्राप्तो भिक्षुर्लकुटे
न हत्वा व्यापादितः । तस्मादपराधात्सोपि नापितो राजपुरुषैस्ताडितः स नापितः पंचत्वं गतः ॥
अतोहं ब्रवीमि ॥ पुराणलब्धमित्यादि ॥ पुरा ह्यत्र कथोद्गारैः कथं निर्णीयते परैः ॥ स्यान्निःका
रणबंधुर्वा किंवा विश्वासघातकः ॥ १ ॥ इदानीं यातु प्रस्तुतमनुसंधीयतां ॥ मलयोपत्य
कायां चित्रवर्णः किं तदधुना विधेयं ॥ मंत्री वदति ॥ देवायातप्रणिधिमुखाच्छ्रुतं मया यन्मल
य

३
हि.उ. मंत्रिणो गृध्रस्योपदेशे चित्रवर्णेनानादरः कृतः॥ अतोऽसदोसौ जेतुं शक्यः॥ तथाचोक्तं॥
लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः॥ मूढो योधावमंता च सुखछेद्यो रिपुः स्मृतः॥
१४ १॥ ततो यावदस्य दुर्गद्वारावरोधं न विदधाति तावन्नद्यद्रिवनवर्त्मसु तद्बलानि । निहंतुं सार
साद्याः सेनापतयो नियुज्यंतां। तथाचोक्तं। दीर्घवर्त्मपरिश्रांतं नद्यद्रिवनसंकुलं॥ घोराग्नि
भयसंत्रस्तं क्षुत्पिपासाहितक्लमं॥१॥ प्रमत्तं भोजनव्यग्रं व्याधिदुर्भिक्षपीडितं॥ असंस्थित
मभूमिष्ठं वृष्टिवातसमाकुलं॥२॥ पंकपांशुजलाछिन्नं सुव्यस्तं दस्युभिर्द्रुतं॥ एवंभूतं म
हीपालः परसैन्यं विघातयेत्॥१॥ अवस्कंदभयाद्राज्ञा प्रजागरकृतश्रमं॥ दिवासुप्तं समाहन्या
न्निद्राव्याकुलसैनिकं॥२॥ अतस्तस्य प्रमादिनो बलं गत्वा यथावकाशं दिवारात्रौ घ्नंतु॥ त
थानुष्ठिते सारसैश्चित्रवर्णस्य सैनिका बहवः सेनापतयश्च निहताः॥ ततश्चित्रवर्णो विषण्णः स्व
मंत्रिणं दूरदर्शिनमाह॥ तात किमित्यस्मदुपेक्षा क्रियते॥ किं क्वाप्यविनयो ममास्ति॥ तथा चोक्तं॥
न राज्यं प्राप्तमित्येवं वर्त्तितव्यमसांप्रतं॥ श्रियं ह्यविनयो हंति जरा रूपमिवोत्तमं॥१॥ दक्षः श्रियम राम
धिगच्छति पथ्याशी कल्यतां सुखमरोगी॥ उद्युक्तो विद्यांतं धर्मार्थयशांसि च विनीतः॥१॥ गृध्रो १४

वदति॥ अविद्वानपि भूपालो विद्यावृद्धोपसेवया। परां श्रियमवाप्नोति जलासन्नतरुर्यथा॥२॥
अन्यच्च॥ पानं स्त्री मृगया द्यूतमर्थदूषणमेव च॥ वाग्दंडयोश्च पारुष्यं व्यसनानि महीभुजां॥३॥
न साहसैकांतरसानुवर्त्तिना न चाप्युपायोपहतांतरात्मना॥ विभूतयः शक्यमवाप्तुमूर्जिता नये
च शौर्ये च वसंति संपदः॥४॥ त्वया च स्वबलोत्साहमवलोक्य साहसैकरसेन मयोपन्यस्तेष्वपि
मंत्रेष्वनवधानं वाक्पारुष्यं च कृतमतो दुर्नीतेः फलमिदमनुभूयते॥ तथाचोक्तं॥ दुर्मंत्रिणं
कमुपयांति न नीतिदोषाः संतापयंति कमपथ्यभुजं न रोगाः॥ कं श्रीर्न दर्पयति कं न निहंति
मृत्युः कं स्त्रीकृता न विषयाः परितापयंति॥५॥ ततो मयाप्यालोचितं॥ प्रज्ञाहीनोऽयं नो चेत्कथं
२ नीतिशास्त्रकथां स्ववागुल्काभिस्तिरयति॥ यतः॥ यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किं।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति॥६॥ तेनाहमपि तूष्णीं स्थितः। राजा बद्धांजलिः
प्राह॥ तात अस्त्ययं ममापराधः। इदानीं यथाहमवशिष्टबलसहितोऽपि प्रत्यावृत्य विंध्याच
लं गच्छामि तथोपदिश॥ गृध्रः स्वगतं चिंतयति क्रियतामत्र प्रतीकारः॥ यतः॥ देवतासु गुरौ गोषु

२
हि.उ. राजसु ब्राह्मणेषु च। नियंतव्यः सदा कोपो बालवृद्धातुरेषु च॥१॥ ब्रूते च विहस्य मा भैषीः समा
१५ श्वसिहि। शृणु देव। मंत्रिणां भिन्नसंधाने भिषजां सांनिपातिके॥ कर्मणि व्यज्यते प्रज्ञा स्वास्थे
को वा न पंडितः॥२॥ अपरं च॥ आरंभंते ऽल्पमेवाज्ञाः कामं व्यग्रा भवंति च॥ महारंभाः कृतधियः
तिष्ठंति च निराकुलाः॥३॥ तदत्र त्वत्प्रतापादेव दुर्गं भंक्त्वा कीर्तिप्रतापबलसहितं त्वा
मचिरेणैव कालेन विंध्याद्रिं नयामि॥ राजाह॥ कथं मम पुनः स्वल्पबलेनैतत् संपद्यते॥ गृध्रो
ब्रवीति॥ देव सर्वं भविष्यति। यतो विजिगीषोरदीर्घसूत्रता विजयसिद्धेरवश्यंभावः॥ तदद्य दुर्गद्वा
रावरोधो विधीयतां॥ अथ प्रणिधिबकेनागत्य हिरण्यगर्भस्य कथितं। देव स्वल्पबल एवायं गृध्रस्य
मंत्रोपदेशादागत्याद्य दुर्गद्वारावरोधं करिष्यति॥ राजा ब्रूते॥ सर्वज्ञ किमधुना विधेयं॥ चक्रो वदति॥ राम
देव स्वबले सारासारविचारः क्रियतां॥ ज्ञात्वा सुवर्णवस्त्रादि यथार्हं प्रसाददानं च क्रियतां॥ तथा चोक्तं॥ १५
यः काकिणीमप्यपथप्रपन्नामन्वेषते निष्कसहस्रतुल्यं॥ कालेषु कोटिष्वपि मुक्तहस्तस्तं राजसिं
हं न जहाति लक्ष्मीः॥१॥ अन्यच्च॥ क्रतौ विवाहे व्यसने रिपुक्षये यशस्करे कर्मणि मंत्रविग्रहे॥ प्रिया

सुनारीष्वधनेषु बंधुषु त्वतिव्ययो नास्ति नराधिपानां॥१॥ मूर्खः स्वल्पव्ययत्रासात्सर्वनाशं करोति च।
कः सुधीः संत्यजेद्भांडं शुल्कस्यैवातिसाध्वसात्॥२॥ राजाह॥ कथमिह समये ऽतिव्ययो नियुज्य
२ हि ते। तथा चोक्तं॥ आपदर्थे धनं रक्षेदित्यादि। मंत्री वदति॥ श्रीमतः कथमापदः॥ राजाह॥ कदाचिच्चलिता
लक्ष्मीः॥ पुनर्मंत्री ब्रूते॥ देव संचितोप्यर्थो विनश्यति॥ तद्देव कार्पण्यं परित्यज्य सुभटा दानमानाभ्यां
पुरस्क्रियतां॥ तथा चोक्तं॥ परस्परज्ञाः संहृष्टास्त्यक्तुं प्राणान्सुनिश्चिताः॥ कुलीनाः पूजिताः सम्य
ग्विजयंते द्विषां बलं॥ अपरं च॥ सुभटाः शीलसंपन्नाः संहताः कृतनिश्चयाः। पंचसप्तापि वा शूरा
मृद्नंति परवाहिनीं॥ किंच॥ शिष्टैरप्यविशेषज्ञ उग्रश्च कृतनाशकः। त्यज्यते किं पुनर्नान्यैर्यश्चाप्या
त्मंभरिर्नरः॥१॥ सत्यं शौर्यं तथा त्यागो नृपस्यैते महागुणाः। एतैर्मुक्तो महीपालः प्राप्नोति खलु वाच्य
तां॥२॥ अमात्यास्तावदवश्यमेव पुनः कर्तव्याः॥ तथा चोक्तं॥ यो मात्यः प्रतिबद्धः स्यात्सहातो नोदये
ष्वपि। स विश्वस्तो नियोक्तव्यः प्राणेषु च धनेषु च॥१॥ धूर्तः स्त्री वा शिशुर्यस्य मंत्रिणः स्युर्महीपतेः॥
अनीतिपवनक्षिप्तः कार्याब्धौ स निमज्जति॥२॥ पश्य देव॥ हर्षक्रोधौ यतौ यस्य कोषः स्वल्पाप्ययेन च॥

३

हि.उ. नित्यं भृत्यानवेक्षा च तस्य स्याद्दिनमापदः॥३॥ येषां राज्ञे समौ स्यातामुपचयापचयौ ध्रुवं॥ अमा
त्यादितितान्राजा नावमन्येत्कदाचन॥४॥ यतः। महीभुजो मदांधस्य विषमे कार्यसागरे।
१९ सज्जातो हि करालंबः सुहृत्सचिवचेष्टितं॥५॥ अथागत्य प्रणम्य मेघवर्णो ब्रूते॥ देव दृष्टिप्रसा
दं कुरु॥ एष युद्धार्थी विपक्षो दुर्गद्वारि तिष्ठति॥ तद्देवपादादेशाद्बहिर्निर्गत्य स्वविक्रमं दर्शयामि
तेन देवप्रसादस्यानृण्यमुपगच्छामि॥ चक्रो वदति॥ मामैवं॥ यदि बहिर्निःसृत्य योद्धव्यं तदा दुर्गा
श्रयणं निःप्रयोजनं॥ अपरंच॥ दुर्गाद्विनिर्गतः शत्रुर्नक्रः स्तोयाद्विनिर्गतः। वनाद्विनिर्गतः
सिंहः शशोपि स्याच्छृगालवत्॥१॥ देव स्वयं गत्वा दृश्यतां युद्धं। यतः। पुरस्कृत्य बलं राजा योध
येदवलोकयन्॥ स्वामिनाधिष्ठितः श्वापि किं न सिंहायते ध्रुवं॥२॥ अनंतरं सर्वे दुर्गद्वारं गत्वा मह
द्दवं कृतवंतः॥ अपरेद्युश्चित्रवर्णो राजा गृध्रमुवाच॥ तात स्वप्रतिज्ञातमधुना निर्वाहय॥ गृध्रो राम
ब्रूते॥ शृणु तावत्॥ अकालसहमत्यल्पं मूर्खव्यसनिनायकं। अगुप्तं भीरुयोधं च दुर्गव्यसनमु १९
च्यते॥ तत्तावदत्र नास्ति॥ उपजापश्चिरारोधोऽवस्कंदस्तीव्रपौरुषं॥ दुर्गस्य लंभनोपायाश्चत्वारः कथि

तारमे॥ अत्र च यथाशक्ति क्रियते यत्नः। कर्णे कथयत्येवमेव। ततोनुदित एव भास्करे प्रातःकाले
विपक्षैः सह चतुर्ष्वपि द्वारेषु प्रवृत्ते समतरयुद्धे दुर्गाभ्यंतरगृहे काकैरनेकशोग्निर्निक्षिप्तः॥ ततो गृहीतं
गृहीतं दुर्गमिति कोलाहलं श्रुत्वानेकगृहेषु प्रदीप्तपावकं प्रत्यक्षेणावलोक्य राजहंसस्य सैनिका
अन्ये च दुर्गवासिनः सत्वरं पलाय्य ह्रदं प्रविष्टाः। यतः॥ सुमंत्रितं सुविक्रांतं सुयुद्धं सुपलायितं। प्राप्तका
लं यथाशक्त्या कुर्यान्नैव विचारयेत्॥१॥ राजहंसश्च सुखी स्वभावान्मंदगतिः सारसद्वितीयश्चित्रव
र्णस्य सेनापतिना कुक्कुटेनागत्यावेष्टितः। हिरण्यगर्भो ब्रूते। सेनापते सारस ममोपरोधान्नात्मानं व्या
पादयिष्यसि गंतुं त्वमधुना समर्थः। तद्गत्वा जलं प्रविश॥ अस्मत्पुत्रं चंद्रचूड नामानं सर्वतसंमत्या
राजानं करिष्यसि॥ सारसो ब्रूते॥ देव मामेवं दुःसहं वचो न वक्तव्यं॥ यावच्चंद्रार्कौ तावद्विजयतां देवः॥
अहं दुर्गाधिकारी तन्मम मांसासृग्विलिप्तेन द्वारवर्त्मना प्रविशतु शत्रुः॥ अपरंच देव॥ क्षमी दाता गु
णग्राही स्वामी पुण्येन लभ्यते॥ राजाह। किंतु॥ शुचिर्दक्षोनुरक्तश्च राज्ञां भृत्योपि दुर्लभः॥१॥ सारसो
ब्रूते॥ शृणु देव॥ यदि समरमपास्य नास्ति मृत्योर्भयमिति युक्तमितोऽन्यतः प्रयातुं॥ अथ मरणमव

[illegible]

श्यमेव जंतोः किमिति मुधा मलिनैशः क्रियेत ॥ ३ ॥ अन्यच्च ॥ जितेच लभते लक्ष्मीर्मृते चापि सुरांगनाः
क्षणविध्वंसिनी काया का चिंता मरणे रणे ॥ भवेस्मिन्पवनोद्भ्रांतवीचिविभ्रमभंगुरे । जायते पुण्ययो
गेन परार्थे जीवितव्ययः ॥ १ ॥ त्वं च देव स्वामी सर्वदा रक्षणीयः ॥ यतः ॥ प्रकृतिः स्वामिना त्यक्ता सम
द्धापि न जीवति ॥ अपि धन्वंतरिर्वैद्यः किं करोति गतायुषि ॥ किंच ॥ नरेशे जीवलोकोयं निमीलति
निमीलति । उदेत्युदीयमाने च रवाविव सरोरुहं ॥ ३ ॥ अथ कुक्कुटेनागत्य राजहंसस्य कातेन खमु
खाघातः कृतः ॥ ततः सत्वरमुपसृत्य सारसेन स्वदेहेनांतरितो राजा ॥ अनंतरं कुक्कुटैर्नखमुखप्र
हारजर्जरीकृतेन सारसेन स्वांगेनाच्छाद्य जले क्षिप्तो हंसराजः ॥ चंचुप्रहारेणाकुक्कुटश्च व्यापादितः ॥
पश्चात्सारसोपि बहुभिर्मिलित्वा व्यापादितः ॥ अथ चित्रवर्णो दुर्गं प्रविश्य दुर्गावस्थितं द्रव्यं ग्राहयित्वा
वंदिभिर्जयशब्देनानंदितः ॥ उक्तं च ॥ जनयंति सुतान्गावः सर्वा एव गवाकृतीन् ॥ विषाणोल्लिखितस्कं
धं काचिदेव गवां पतिं ॥ विष्णुशर्मोक्तं ॥ स तावत्स्वव्रीतान्क्षयलोकान्विद्याधरीभिः परिवृतोनुभ
वतु महासत्वः ॥ तथा चोक्तं ॥ आहवेषु च ये शूराः स्वाम्यर्थे त्यक्तजीविताः ॥ स्वामिभक्ताः कृतज्ञाश्च ते नराः स्व
र्गगामिनः ॥ २ ॥ अपरं च ॥ यत्र तत्र हतः शूरः शत्रुभिः परिवारितः ॥ अक्षयान् लभते लोकान्यदि क्लैव्यं न भाषते ॥ १ ॥

श्रीगणेशाय नमः ॥ अथ चतुर्थकथारंभः ॥ विष्णुशर्मोवाच ॥ विग्रहः स्तावत्कथितः संधि
रधुना विधीयते ॥ यस्यायमाद्यः श्लोकः ॥ प्रवृत्ते चातिसंग्रामे राज्ञोर्निहतसैन्ययोः ॥ अन्यो
न्यं गृध्रचक्राभ्यां वाचा संधिः कृतः क्षणात् ॥ १ ॥ राजपुत्रा ऊचुः ॥ कथमेतत् ॥ विष्णुशर्मा कथय
ति ॥ ततस्तेन राजहंसेनोक्तं ॥ केनायमस्मद्दुर्गे निक्षिप्तोग्निः किं पारक्येन किंवास्मद्दुर्गनिवा
सिना केनापि विपक्षप्रयुक्तेन वा ॥ चक्रवाक उवाच ॥ देव भवतो निष्कारणबंधुरसौ मेघवर्णः
सपरिवारो नात्रावलोक्यते ॥ तन्मन्ये तस्यैव विचेष्टितमिदं ॥ राजा क्षणं विचिंत्याह ॥ अस्ति तावदेवं
मम दुर्दैवमेतत् ॥ तथा चोक्तं ॥ अपराधः स दैवस्य न पुनर्मंत्रिणामयं ॥ कार्यं सुघटितं क्वा
पि मन्ये विघटितं यतः ॥ ३ ॥ मंत्री ब्रूते ॥ उक्तमेवैतत् ॥ विषमां हि दशां प्राप्य दैवं गर्हयते नरः ॥
आत्मनः कर्मदोषांश्च नैव जानात्यपंडितः ॥ ४ ॥ अपरं च ॥ सुहृदां हितकामानां यो वाक्यं नाभि
नंदति ॥ स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ राजोवाच ॥ कथमेतत् ॥ मंत्री कथयति ॥
अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः ॥ तत्र चिरं संकटविकटनामानौ हंसौ निवसतः ॥
तयोर्मित्रं कंबुग्रीवनामा कूर्मः प्रतिवसति ॥ अथ धीवरैरागत्य तत्रोक्तं ॥ यदत्रास्माभि

४

हि॰उ॰ रद्योपि वा प्रातर्मत्स्यकूर्मादयो व्यापादयितव्याः॥ तदाकर्ण्य कूर्मो हंसावाह॥ सुहृदौ श्रु
तोयं धीवरालापः॥ अधुना किं मया कर्त्तव्यं। तावाहतुः। ज्ञायतां तावत् ततः पुनर्यदुचितं त
१ त्कर्त्तव्यं॥ कूर्मो ब्रूते॥ मा मैवं॥ यतो दृष्टव्यतिकरोहमत्र। तथाचोक्तं॥ अनागतविधाता
च प्रत्युत्पन्नमतिस्तथा। द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति॥ हंसावाहतुः॥ कथमेतत्॥
सोब्रवीत्॥ पुरा एतस्मिन्नेव सरसि एवंविधेष्वेव धीवरेषूपस्थितेषु मत्स्यत्रयेणालोचितं॥
तत्रानागतविधाता नामैको मत्स्यस्तेनोक्तं॥ अहं तावज्जलाशयांतरं गच्छामीत्युक्त्वा स ह्रदां
तरं गतः॥ अपरेण प्रत्युत्पन्नमतिना मत्स्येनोक्तं भविष्यदर्थे प्रमाणाभावात्कुत्र किं समाधा
तव्यं॥ तदुत्पन्ने यथाकार्यमनुष्ठेयं॥ तथाचोक्तं॥ उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान्।
वणिजो भार्यया जारः प्रत्यक्षे निह्नुतो यथा॥ १॥ यद्भविष्यः पृच्छति॥ कथमेतत्॥ प्रत्युत्पन्नम
तिः कथयति॥ अस्ति विक्रमपुरे समुद्रदत्तो नाम वणिक्॥ तस्य रत्नप्रभा नाम वधूः केनापि सेव राम
केन सर्वं सर्वदा रमते॥ यतः॥ न स्त्रीणामप्रियः कश्चित्प्रियो वापि न विद्यते॥ गावस्तृणमिवारण्ये १
प्रार्थयंति नवं नवं॥ १॥ अथैकदा सा रत्नप्रभा तस्य सेवकस्य मुखे चुंबनं ददती तेन समुद्र

क

दत्तेनावलोकिता॥ ततः सा बंधकी सत्वरं भर्तुः समीपमुपगत्याह॥ नाथ एतस्य सेवकस्य ता
वन्महती निर्वृत्तिः॥ यतः कर्पूरगंधः प्रत्यहमस्य मुखे मया घ्रातः॥ तथाच॥ आहारो द्विगुणः
स्त्रीणां बुद्धिस्तासां चतुर्गुणा। षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः॥ ततस्तत्सेवको
नापि प्रकुप्योक्तं॥ यस्य गृहस्य ईदृशी भार्या तत्र कथं सेवकेन स्थेयं॥ यत्र प्रतिक्षणं वधूः सेव
कस्य मुखं जिघ्रति॥ ततोसावुत्थाय चलितः। तेन साधुना यत्नात्प्रबोध्यानीतः॥ अतोहं य ५
ब्रवीमि॥ उत्पन्नामापदमित्यादि॥ ततो यद्भविष्येणोक्तं॥ यदभावि न तद्भावि भावि चेन्न
तदन्यथा। इति चिंताविषघ्नोयमगदः किं न पीयते॥ अथ प्रातर्जालेन बद्धः सन् प्रत्युत्पन्न
मतिर्मृतवदात्मानं दर्शयित्वा स्थितः। ततो जालादपसारितः प्रत्युत्पन्नमतिः सशक्त्योत्प्लुत्य
गंभीरं नीरं गतः॥ यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः॥ अतोहं ब्रवीमि अनागतविधाता
घ चेत्यादि॥ तद्यथाद्यं ह्रदमन्यं प्राप्नोमि तथा विधीयतां॥ हंसावाहतुः॥ कथमुपायः संभवति॥
सोब्रवीत्॥ युवाभ्यां चंचुधृतकाष्ठखंडमेकं मया मुखेनावलंबनीयं॥ ततो भवतोः पक्षबलेन

हि॰ ३ मयापि सुखेन गंतव्यं ॥ हंसौ ब्रूवाते ॥ संभवत्येष उपायः ॥ किंतु ॥ उपायं चिंतयन् प्राज्ञस्तथा
यमपि चिंतयेत् ॥ पश्यतो बके मूर्खस्य नकुलैर्भक्षिताः प्रजाः ॥ कूर्मो ब्रूते ॥ कथमेतत् ॥ हं
सौ कथयतः ॥ अस्त्युत्तरपथे गृध्रकूटो नाम गिरिः ॥ तत्रैरावतीतीरे न्यग्रोधपादपे बका निवसं
ति ॥ तस्य वृक्षस्याधस्ताद्विवरे सर्पस्तिष्ठति स च सर्पस्तेषां बकानामपत्यानि नित्यं खादति ॥
ततः शोकार्त्तानां बकानां प्रलापं श्रुत्वा केनापि वृद्धबकेनोक्तं ॥ स्वयमेवं कुरुत ॥ मत्स्याना
दाय नकुलविवराद्दारभ्य सर्पविवरं यावत्पंक्तिक्रमेणैकैकशो मत्स्या विस्तीर्यंतां ॥ ततस्त
दाहारलुब्धैर्नकुलैरागत्यायं सर्पो द्रष्टव्यः स्वभावद्वेषाद्व्यापादयितव्यश्च ॥ तथानुष्ठिते तद्वृ
त्तं ॥ अथ तेन नकुलेन बकशावकारावः श्रुतः पश्चात्तैर्नकुलैस्ते शावका वृक्षमारुह्य खादिताः ॥
अतोऽहं ब्रवीमि ॥ उपायमित्यादि ॥ आवाभ्यां नीयमानं त्वां विलोक्य लोकैः किंचित्किंचिद्वक्तव्य राम
मेव ॥ तदाकर्ण्य यदि त्वमुत्तरं दास्यसि तदा त्वन्मरणं सर्वथा तस्मादत्रैव स्थीयतां ॥ कूर्मो ब्रूते ॥ २
किमहं मज्ञः ॥ न किमपि मया वक्तव्यं ॥ ततस्ताभ्यां काष्ठखंडमानीतं कूर्मस्तन्मध्ये दंतैर्धृतं ॥

हंसाभ्यां काष्ठखंडस्य प्रांतौ समुद्धृतौ ॥ पुनश्चाकाशवर्त्मना हंसाभ्यां ह्रियमाणं कूर्ममालोक्य
गोपैरित्यभिहितं ॥ किमेतत्प्राकारं पक्षिभ्यां ह्रियते ॥ केनापि किंचिदुक्तं केनापि किंचित् ॥ त
तो ग्रामीणो गोपालैरित्युक्तं ॥ पक्षिभ्यां कूर्मो ह्रियते ॥ इति सम्यक् परिज्ञाय सर्वे गोरक्षका
लकुटहस्ताः समुद्धाविता उक्तवंतश्च ॥ यदायं पतति तदात्रैवास्माभिर्भक्त्वा भक्षितव्योयं
कूर्मः ॥ केनापि लवणमानेयमित्युक्तं ॥ केनचिदुक्तं तैलमानेयं ॥ केनापि दात्रमानेयं म
येत्यादि परुषवचनं श्रुत्वा क्रोधविस्मृतपूर्वसंकेतः स कूर्मः कोपादुच्चैरवदत् ॥ युष्माभिर्भ
स्म भक्षितव्यमिति वदन्नेव पतितो व्यापादितश्च ॥ अतोऽहं ब्रवीमि ॥ सुहृदां हितकामानामि
त्यादि ॥ अथ प्रणिधिप्रहितो बक आगत्योवाच ॥ देव मया प्रागेव विनिवेदितं ॥ यत् दुर्गशो
धनं प्रति त्वरा युष्माभिः क्रियतां ॥ तन्न कृतं ॥ तदनवधानस्य फलमिदमनुभूतं दुर्गदाहश्च
मेघवर्णनाम्ना वायसेन गृध्रप्रयुक्तेन कृतः ॥ राजा विहस्याह ॥ प्रमाणादुपकाराद्वा यो वि
श्वसिति शत्रुषु। स सुप्त इव वृक्षाग्रे पतितः प्रतिबुध्यते ॥ बक उवाच ॥ इतो दुर्गदाहं विधा

४

हि०३ यद्यदागतो मेघवर्णस्तदा चित्रवर्णेन सप्रसादितेनोक्तं ॥ अयमेव मेघवर्णोऽत्र कर्पूरद्वीपेऽभि
षिच्यतां । तथा चोक्तं ॥ कृतकृत्यस्य भृत्यस्य कृतं नैव प्रणाशयेत् ॥ फलेन मनसा वाचा दृष्ट्या
३ चैव प्रहर्षयेत् ॥ चक्रो ब्रूते ॥ ततस्ततः ॥ प्रणिधिः कथयति ॥ ततः प्रधानमंत्रिणा गृध्रेणाभिहितं ।
देव नेदमुचितं ॥ प्रसादांतरं क्रियतां ॥ अविचारयतो युक्तिकथनं तुषकंडनं । नीचे पुपकृतं राज
न्वालुकास्वेव मूत्रितं ॥ अपरं च ॥ महतामास्पदे नीचः कथमपि न कर्त्तव्यः ॥ तथा चोक्तं ॥ नीचः
श्लाघ्यपदं प्राप्य स्वामिनं हंतुमिच्छति ॥ मूषको व्याघ्रतां प्राप्य मुनिं हंतुं गतो यथा ॥ १ ॥ चि
त्रवर्णः पृच्छति कथमेतत् ॥ दूरदर्शी कथयति ॥ अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः ।
तेनैकदा गौतमी तीरं स्नानार्थं गच्छता श्येनमुखाद्भ्रष्टो मूषकशावकः पतितो दृष्टः तं दृष्ट्वा द
यालुना तेन मुनिना मूषकशावकं हस्ते कृत्वा पर्णशालायामानीय नीवारकणैः परि पा राम
लितः ॥ ततो दिनेषु गच्छत्सु मूषकशावको हृष्टपुष्टांगो भवत् ॥ एकदा वने विचरता तेन मूष ३
केन बिडालारावः श्रुतः ॥ तच्छ्रुत्वा मूषकशावकः कंपितः ॥ ततो मुनिनाइं विभेतीति ज्ञातं ॥

अयं बिडालाद्बिभेति तस्मादहं करोमि यथास्य भयं न भवति ततः सिद्धमंत्रैरभिमंत्र्य स मूषको बिडालः कृ
तो नीतः ॥ अथैकदा तत्रारवेटिकानां कुक्कुराः समायाताः ॥ तानवलोक्य बिडालस्यातिभयमुत्पन्नं ॥
ततो मुनिना विहस्याभिहितं ॥ अयं बिडालोऽपि हतः ॥ कुक्कुराद्बिभेति ॥ ततः कुक्कुरमेवैनं करोमि ॥
पुनरपि पूर्ववदभिमंत्र्य स बिडालः कुक्कुरतां नीतः ॥ ततो दिनेषु गच्छत्सु तत्रैकदा व्याघ्रः समा
यातः ॥ ततः कुक्कुरो मुनेः समीपं पलाय्य शरणं गतः । ततो मुनिना चिंतितं कुक्कुरोऽपि हतो व्या
घ्राद्बिभेति ततोऽमुं व्याघ्रमेव करोमि ॥ ततः पुनरभिमंत्र्य कुक्कुरो व्याघ्रतां नीतः ॥ तं व्याघ्रम
वलोक्याश्रमवासिभिर्यतिभिर्मुनिं प्रत्युदितं ॥ असौ मूषकशावकः क्रमाद्व्याघ्रतां नीतो भवद्भि
रिदं न कृतं ॥ यतोऽयं दुष्टसत्त्वो मनुष्यखादकस्तस्मादेनं मूषकमेव कुरुत ॥ तदाकर्ण्य व्याघ्रेण
चिंतितं ॥ मामनुचिनीचं कर्तुमसौ महातपाः स्वसमर्थः ॥ अपरे किमपि कर्तुं न शक्नुवंति ॥ ततो
मुमेव मुनिं भक्षयामि ॥ यथा व्याघ्र एव तिष्ठामि ॥ तद्विचिंत्य मुनिं हंतुं यावद्गच्छति तावन्मुनि
ना तस्येंगितं परिज्ञाय चिंतितं ॥ मूषकशावकोऽयं मयैव क्रमेण व्याघ्रतां नीतः ॥ इदानीं च मामेव ह

४

हि॰ ठ मुद्यातः॥ नैतदहं मूषकमेव करोमि॥ ततो मंत्रैरभिमंत्र्य स व्याघ्रो व्याहृत्य मूषकः कृतः॥ अतोहं
ब्रवीमि। नीचः श्लाघ्यपदं प्राप्येत्यादि॥ देव सुकरमपि नैतत्॥ अ॥ अन्यच्च॥ भक्षयित्वा बहून्मत्स्यानुत्त
४ माधममध्यमान्॥ अतिलौल्याद्बकः कश्चिन्मृतः कर्कटसंग्रहात्॥१॥ राजा चित्रवर्णः पृच्छति॥
४व कथमेतत्॥ दूरदर्शी कथयति॥ अस्ति मालवविषये पद्मगर्भाभिधानं सरः॥ तत्र विश्वासघातको नाम
बकस्तिष्ठति। सर्वत्र तत्र सरसि सदैव चरन्नेकदा सविषादवान्भूय तत्र स्थितः॥ अ॥ यतोपि मत्स्या
न्न भक्षयति॥ ततो मत्स्यैरुक्तं दूरादेव॥ भो बक किमिति त्वं सविषाद इव दृश्यते॥ वैराग्यकारणं ब्रू
हि॥ ततो बकः कथयति। मम जन्मभूमिरियं। अ॥ जीवन हानिश्च॥ सरश्च शोषं यास्यति॥ तस्मात्करपि
मत्स्यैरभिहितं कथमेतत्संभूतं गतं शोषं यास्यति॥ बकः कथयति॥ मयैतद्भगवतो गरुडस्यानु राम
खात्समाकर्णितं॥ द्वादशवार्षिकी अनावृष्टिर्भविष्यति ततः प्रभूतजलान्यपि शोषं यास्यति॥ यादां ४
सि च विनाशमेष्यंति। मम जीवन हानिश्च यास्यति॥ तदहमेतत्सरः परित्यज्य महज्जलाशयां
तरं गमिष्यामि॥ तदाकर्ण्य मत्स्यैरुक्तं॥ भो बक अस्मानपि तत्र नय॥ ततो बकेनोक्तं॥ अरु

मेकवेलायां सर्वाननपि नेतुं न शक्नोमि॥ एकैकशः पक्षोपरि कृत्वा नेष्यामि॥ ततो मत्स्यैरुक्तं
भवतु तथैव क्रियतां॥ ततो बकेन मत्स्यमेकं पक्षोपरि निधाय दूरं गत्वा॥ शिलोपरि भ
क्षितं॥ अन्योपकारिणं स्थानं पितु नय॥ तथा चोक्तं॥ उपकारिणि [illegible] मासे विर्जमिते शाप
कारिणां। उपकारापकारौ हि लभ्यते [illegible] मते यो॥१॥ अथ कतिपय अन्यमत्स्यमादाय
निलित कौशांतरं गत्वा तत्र पाषाणपीठे उपविश्य तं मत्स्यं खादितवान्॥ एवं विश्वासघा
त प्रतिदिनमेकैकशो खादति॥ अनंतरं कुलीरस्तमुवाच॥ अरे बक मामपि तत्र नय॥
ततः कुलीरमपि पृष्ठे कृत्वा तत्रैव शिलायां गत्वा उपविष्टः॥ ततः कुलीरेणा मत्स्यास्थिकालं
यं दृष्ट्वा सर्वे मत्स्या अनेनैव भक्षिता इति परिज्ञाय चिंतयत्॥ हा हतोस्मि मंदभाग्यः॥ भ
वतिदानीं समयोचितं व्यवहरामि॥ यतः॥ तावद्भयाद्धि भेतव्यं यावद्भयमनागतं॥ आगतं तु
भयं वीक्ष्य प्रहर्तव्यमभीतवत्॥ श॥ अपरंच॥ अभियुक्तो यदा पश्येन्न किंचिद्गतिमात्मनः॥ हि॰ २
युध्यमानस्तदा प्राज्ञो म्रियेत रिपुणा सह॥२॥ अन्यच्च॥ यत्रायुद्धे ध्रुवो मृत्युर्युद्धे जीवित

हि॰ ३ संशयः ॥ तमेव कालं युद्धस्य प्रवदंति मनीषिणः ॥ ३ ॥ इत्यालोच्यासौ कुलीरो बकस्य मृणालतं
५ तुसदृशीं ग्रीवां चिच्छेद ॥ अतोऽहं ब्रवीमि ॥ भक्षयित्वेत्यादि ॥ ततः स चित्रवर्णो राजा पुनरब्रवीत् ॥
शृणु तावन्मंत्रिन्मयैतदालोचितमस्ति ॥ यदत्रावस्थितेन मेघवर्णेन राज्ञा यावंति कर्पूरद्वीप
स्योत्तमवस्तूनि तान्यस्माकमुपनेतव्यानि ॥ तेन महता विलासेनास्माभिर्विंध्याचले स्थातव्यं ॥
दूरदर्शी विहस्याह ॥ देव ॥ अनागतवतीं चिंतां कृत्वा यस्तु प्रहृष्यति ॥ स तिरस्कारमाप्नोति भग्न
भांडो यथा द्विजः ॥ ४ ॥ राजा पृच्छति ॥ कथमेतत् ॥ दूरदर्शी कथयति ॥ अस्ति देवकोटनगरे देव
शर्म्मा नाम ब्राह्मणः ॥ तेनैकदाक्षयतृतीयायां शक्तुपूर्णः शरावसंचयः प्राप्तः ॥ तं नीत्वा कुंभ
कारमंडपे गतः ॥ ततो सो भांडपूर्णकुंभकारमंडपिकायामेकदेशे सुप्तः संनचिंतयत् ॥ यद्यहमि
मं शक्तुशरावसंचयं विक्रीय दशकपर्दकान् प्राप्नोमि ॥ तदा तैरिह घटशरावादिकमुपक्रीय विक्री राम
यानेकधा वृद्धैस्तैर्धनैः पुनः पूगवस्त्रादिकमुपक्रीय विक्रीय लक्षसंख्यानि धनान्युत्पाद्य विवाह ५
चतुष्टयं करोमि ॥ ततस्तासु पत्नीषु या रूपयौवनवती तस्यामधिकानुरागं करोमि ॥ अनं

तरं जातेर्ष्यास्ताः सपत्न्यो यदा द्वंद्वं करिष्यंति ततः कोपाकुलोऽहं तां पत्नीमित्थं लगुडेन ताडयिष्या
मीत्यभिधाय तेन लगुडः क्षिप्तः ॥ अथ शक्तुशरावश्चूर्णितः कुंभकारस्य च बहूनि भांडानि
चूर्णितानि ॥ ततो भग्नभांडशब्देनागत्य कुंभकारेणेदं दृष्ट्वा स ब्राह्मणस्तिरस्कृतो मंडपिका
गर्भाद्बहिः कृतश्च ॥ अतोऽहं ब्रवीमि ॥ अनागतवतीं चिंतामित्यादि ॥ ततो राजा रहसि गृध्र
मपृच्छत् ॥ तात यथा कर्त्तव्यमुपदिश ॥ गृध्रो ब्रूते ॥ मदोद्धतस्य नृपतेः संकीर्णस्येव दंतिनः ॥
गच्छंत्युन्मार्गयातस्य नेतारः खलु वाच्यतां ॥ १ ॥ शृणु देव ॥ तावत्किमस्माभिर्दुर्गं बल
दर्पाद्भग्नं किं वा भवत्प्रतापाधिष्ठितेनोपायेन ॥ राजाह ॥ भवतामुपायेन ॥ गृध्रो ब्रूते ॥ यद्य
स्मद्वचनं क्रियते तदा स्वदेशे गम्यतामधुना ॥ अन्यथा संप्रत्यासन्ने वर्षाकाले तुल्यबले
न सह पुनर्विग्रहे सत्यस्माकं परभूमिस्थानां स्वदेशगमनमपि दुर्लभं भविष्यति ॥ सुखशो
भार्थं च संधाय गम्यतां ॥ दुर्गं भंगः कीर्त्तिश्च लब्धैव ॥ मम संमतं तावदेतत् ॥ यतः ॥ यो हि धर्मं

४

८१

हि॰ ३ पुरस्कृत्य हित्वा भर्त्तुः प्रियाप्रिये ॥ अप्रियाण्यपि तथ्यानि तेन राजा सहायवान् ॥१॥ अपरंच ॥
६ संधिमिच्छेत्समेनापि संदिग्धो हि जयो युधि ॥ न युद्धे संशयं कुर्यादित्युवाच बृहस्पतिः ॥२॥ यु
द्धे विनाशो भवति कदाचिदुभयोरपि । सुंदोपसुंदावन्योन्यं नष्टौ तुल्यबलौ न किं ॥३॥ अन्य
च्च ॥ सुहृद्वाक्यं तथा राज्यमात्मानं कीर्त्तिमेव च ॥ युधि संदेहदोलास्थं को हि कुर्याद्वालिशः ॥
राजाह ॥ तत्प्रागेव किं नैवमुपदिष्टं भवद्भिः ॥ मंत्री ब्रूते ॥ तदा किं मम वचनं पर्य्यवसानपर्यं
तमवगतं भवद्भिः ॥ तदपि मम संमत्या नायं विग्रहारंभः ॥ यतः ॥ संधेय गुणा युक्तोऽयं हिरण्य
गर्भो राजा न विग्राह्यः ॥ तथाचोक्तं सत्यार्यौ धार्मिकानार्यौ भ्रातृसंघातवान्बली । अनेकयुद्धवि
जयी संधेयाः सप्त कीर्त्तिताः ॥१॥ सत्योऽनुपालयन्सत्यं संधितो नैति विक्रियां ॥ प्राणबाधेपि राम॰
सुव्यक्तमार्यो नायात्यनार्यतां ॥२॥ धार्मिकस्याभियुक्तस्य सर्वएव हि युध्यते ॥ प्रजानुरागा ६
द्धर्माच्च दुःखोच्छेद्यो हि धार्मिकः ॥३॥ संधिः कार्योप्यनार्येण विनाशे समुपस्थिते । विना तस्या

राम॰

श्रयेणान्यः कुर्वाणः कालयापनं ॥४॥ संहतत्वाद्यथा वेणुर्निविडैः कंटकैर्वृतः ॥ न शक्यते समु
च्छेत्तुं भ्रातृसंघातवांस्तथा ॥५॥ बलिना सह योद्धव्यमिति नास्ति निदर्शनं ॥ प्रतिघातं न हि घ
नः कदाचिदुपसर्पति ॥६॥ जामदग्न्येः सुतस्यैव सर्वः सर्वत्र सर्वदा ॥ अनेकयुद्धजयिनः प्र
तापादेव भज्यते ॥७॥ अनेकयुद्धविजयी संधानं यस्य गच्छति ॥ तत्प्रतापेन तस्याशु वशं गच्छंति
विद्विषः ॥८॥ अत्र बहुभिर्गुणैरुपेतः संधेयो राजा । चक्रवाको ब्रवीति ॥ सर्वमवगतं ॥ व्रज पुनः
पुनर्गताऽऽगमिष्यामीति ॥ अथ हिरण्यगर्भश्चक्रवाकं पृष्टवान् ॥ असंधेयाः कतितान्श्रो
तुमिच्छामि ॥ मंत्री ब्रूते । देव कथयामि । बालो वृद्धो दीर्घरोगस्तथा ज्ञातिबहिष्कृतः ॥ भीरुको भी
रुकजनो लुब्धो लुब्धजनस्तथा ॥ विरक्तप्रकृतिश्चैव विषयेष्वपि शक्तिमान् ॥ अनेकचित्तमंत्रस
स्तु देवब्राह्मणनिंदकः ॥ दैवोपहतकश्चैव चिंतकएवच ॥ दुर्भिक्षव्यसनोपेतो बलव्यसन
संकुलः ॥३॥ अदेशस्थो बहुरिपुर्युक्तः कालेन कश्च न ॥ सत्यधर्मव्यपेतश्च विंशतिः पुरुषा
अमी ॥४॥ एतैः संधिं न कुर्वीत विगृह्णीयात्तु केवलं ॥ एते विगृह्यमाणा हि क्षिप्रं यांति रिपो
र्वशं ॥५॥ बालस्याल्पप्रभावत्वान्न लोको योद्धुमिच्छति ॥ युद्धायुद्धफलं यस्माज्ज्ञातुं शक्तो

४

राम हि॰उ॰ ७

न्नकालिशः॥६॥ उत्साहशक्तिहीनत्वाद्धोदीर्घामयस्तथा। स्वैरेवपरिभूयेते द्वावप्येतावसंश
यं॥७॥ सुखोच्छेद्यस्तुभवतिसर्वज्ञातिविरहिःकृतः॥ ताएवैनंविनिघ्नंतिज्ञातयस्त्वात्मसात्कृताः
॥८॥ भीरुर्युद्धपरित्यागात्स्वयमेवापगच्छति॥ वीरोप्यवीरपुरुषैः संग्रामेतैर्विमुच्यते॥९॥
लुब्धस्यासिद्धिभागित्वान्नयुध्यंतेऽनुजीविनः॥ लुब्धोऽनुजीविकैरेवदानभिन्नैर्निहन्यते॥१॥
संत्यज्यतेप्रकृतिभिर्विरक्तःप्रकृतिर्युधि॥ सुखाभियोज्योभवतिविषयेष्वतिशक्तिमान्॥
११॥ अनेकचित्तमंत्रस्तु द्वेष्योभवतिमंत्रिणां॥ अनवस्थितचित्तत्वात्सकार्येतैरुपेक्ष्यते॥१२॥
सदाधर्मबलीयस्त्वाद्देवब्राह्मणनिंदकः। त्यज्यतेसजनैःसद्भिरनाचारंविगर्हितं॥१३॥
विशीर्यतेस्वयंह्येवंदैवोपहतकस्तथा। संपत्तेश्चविपत्तेश्चदैवमेवहिकारणं॥१४॥ इतिदैवपरो
ध्यायन्नात्मानमपिचेष्टते॥ दुर्भिक्षव्यसनीचैवस्वयमेवावसीदति॥१५॥ बलव्यसनयुक्तस्ययो राम ७
द्धुंशक्तिर्नजायते॥ अदेशस्थोपिरिपुणास्वल्पकेनापिहन्यते॥१६॥ ग्राहोल्पीयानपिजलेगजेंद्र
मपिकर्षति॥ बहुशत्रुस्तुसंत्रस्तःश्येनमध्येकपोतवत्॥१७॥ येनैवगच्छतिपथातेनैवाशु
विपद्यते॥ अकालसैन्ययुक्तस्तुहन्यतेकालयोधिना॥१८॥ कौशिकेनहतोरातिर्निशींशीघ्र

थाइववायसः॥ सत्यधर्मव्यपेतेननसंदध्यात्कदाचन॥१९॥ सुसंधितोप्यसाधुत्वादचिराद्या
तिविक्रियां॥ अपरमपिकथयामि॥ संधिविग्रहयानासनसंश्रयद्वैधीभावाः षाड्गुण्यंक
र्मणांपरंभोपायः॥ पुरुषद्रव्यसंपद्देशकालविभागोविनिपातप्रतीकारःकार्यसिद्धिश्चेति
पंचांगोमंत्रः॥ सामदंडभेददानादिचत्वारउपायाः॥ उत्साहशक्तिर्मंत्रशक्तिःप्रभुशक्तिश्चेति
शक्तित्रयं॥ एतत्सर्वमालोच्यनीत्याविजीगीषवोभवंतिमहांतः॥ यतः॥ याहिप्राणपरि
त्यागमूल्येनापिनलभ्यते॥ साश्रीर्नीतिमतांवेश्मचंचलापिनमुंचति॥१॥ तथाचोक्तं॥ वित्तं
सदायस्यसमंविभक्तं गूढश्चरोनिभृतश्चमंत्रः॥ नचाप्रियंप्राणिषुयोब्रवीति ससागरांतां
पृथिवींप्रशास्ति॥२॥ किंतु॥ देवयद्यपिमहामंत्रिणागृध्रेणसंधानमुपन्यस्तंतथापि
नसंत्यनुभूतजयदर्पान्नानुमंतव्यं तदेवंक्रियतां॥ अस्मन्मित्रंसिंहलद्वीपस्यमहाबलोना
न मसारसोराजाजंबूद्वीपेप्याकोपंजयंतु॥ यतः॥ सुगुप्तमाधायसुसंहतेनबलेनवीरोवि
चरन्नरातिं॥ संतापयेद्येनसुखंप्रतप्तस्तापेनसंधानमुपैतितप्तः॥१॥ राजाह॥ एवमस्त्वित्यु

४

हि॰उ॰ क्ता विचित्रो नाम बकः सुगुप्तस्तेनैवं दत्त्वा हिं सिंहलद्वीपं प्रस्थापितः॥१॥ अथ प्रणिधिः पुन
८ रागत्योवाच॥ दे॥ देव श्रूयतां तत्रत्यः प्रस्तावः। एवं तत्र गृध्रेणोक्तं॥ यद्देव मेघवर्णस्तत्र चिरमु
षितः स वेत्ति किं संधेयगुणयुक्तो हिरण्यगर्भो राजा चक्रवाको मंत्री वा नवा॥ मेघवर्ण उ
वाच॥ देव हिरण्यगर्भो राजा युधिष्ठिरसमो महाशयः। चक्रवाकसदृशो मंत्री न क्वापि॥ राजा
ह॥ यद्येवं कथमसौ त्वया वंचितः। मेघवर्णो ब्रूते॥ विश्वासप्रतिपन्नानां वंचने का विदग्धता।
अंकमारुह्य सुप्तस्य हंतुः किं नाम पौरुषं॥ शृणु देव॥ तेन चक्रवाकेनाहं प्रथमदर्शनएव
ज्ञातः॥ किंतु महाशयो सौ राजा तेन मया विप्रलब्धः॥ तथा चोक्तं॥ आत्मौपम्येन धूर्तानां वि
श्वासं योधिगच्छति॥ स तिरस्कारमाप्नोति ब्राह्मणश्छागतो यथा॥१॥ राजाह। कथमेतत्॥ राम
मेघवर्णः कथयति॥ अस्ति गौतमारण्ये प्रस्तुतो यज्ञः॥ तदर्थं कश्चिद्ब्राह्मणो ग्रामांतराच्छाग ८
मुपक्रीय स्कंधे कृत्वा गच्छन् धूर्तत्रयेणावलोकितः॥ ततस्ते धूर्ताः समालोच्य प्रांतरत्रयवृक्ष
तले तस्य ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः॥ तत्रैकेन धूर्तेन स मागच्छन्स ब्राह्मणोभिहितः॥

त२

भोः किमिति त्वया कुक्कुरः स्कंधेनोह्यते। विप्रो ब्रूते॥ नायं श्वा यज्ञच्छागोयं॥ अनंतरं पुनर्द्वि
औ तीयेन शामात्रस्थितेन तदेव चोक्तं॥ तदाकर्ण्य ब्राह्मणः छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य
स्कंधे कृत्वा दोलायमानमतिश्चलितः॥ तथा चोक्तं॥ मतिर्दोलायते नूनं सतामपि खलो
क्तिभिः। ताभिर्विश्वासितो यो सौ म्रियते चित्रकर्णवत्॥१॥ राजाह। कथमेतत्॥ सोवदत्॥
अस्ति कस्मिंश्चिद्देशे मदोत्कटो नाम सिंहः॥ तस्यानुचरास्त्रयः। काको व्याघ्रः शृगालश्च॥
अथ तैर्भ्रमद्भिः सार्थाद्भ्रष्टः उष्ट्रो दृष्टः पृष्टश्च। कुतो भवानागतः स चात्मवृत्तांतमकथयत्॥
तैश्च नीत्वासौ सिंहे समर्पितः। तेन चाभयवाचं दत्वा चित्रकर्णो नाम कृत्वा स्थापितः॥ अथ
कदाचित्सिंहस्य शरीरवैकल्यात्प्रभूतवृष्टिकारणाच्चाहारमलभमानास्ते व्यग्रा बभूवुः॥
ततः काकव्याघ्रगोमायुभिरालोचितं॥ चित्रकर्णमेव यथा स्वामी व्यापादयति तथा कुर्मः॥
किमनेन कंटकभुजास्माकं॥ व्याघ्रो ब्रूते॥ स्वामिनाभयवाचं दत्वा संगृहीतः कथमेवं सं
भवति॥ वायसो वदति॥ अस्मिन्नवसरे क्षुधितः स्वामी पापमपि करिष्यति॥ त्यजेत्क्षुधा

४

हि॰उ॰ र्त्ता महिलापि पुत्रं खादेत्क्षुधार्त्ता भुजगी स्वमंडं ॥ बुभुक्षितः किं न करोति पापं क्षीणा नरा निः
करुणा भवंति ॥१॥ अन्यच्च ॥ मत्तः प्रमत्तश्चोन्मत्तः श्रांतः क्रुद्धो बुभुक्षितः ॥ लुब्धो भीरुस्त्वरा
८ युक्तः कामुकश्च न धर्मवित् ॥२॥ इति निश्चित्य सिंहांतिकं जग्मुः ॥ सिंहेनोक्तं ॥ आहारार्थं प्राप्तं
किंचित् । काकेनोक्तं । यत्नादपि न किंचित्प्राप्तं सिंहो ब्रूते । कोधुना जीवनोपायः ॥ काकः कर्णे भू
त्वा चित्रकर्ण इति ॥ सिंहः कर्णौ स्पृष्ट्वा भूमिं स्पृशति । मयैतस्याभयवाचं दत्वा समानीतः ॥ त
त्कथमेवं युज्यते । तथाहि । न गोप्रदानं न महीप्रदानं न चाम्बरदानं न तथान्नदानं । सुवर्णदानं न च र
त्नदानं यत्सर्वदानेष्वभयप्रदानं ॥ अन्यच्च ॥ सर्वकामसमृद्धस्य अश्वमेधस्य यत्फलं । तत्फलं ल
भते त्रस्ते रक्षिते शरणागते ॥१॥ काको ब्रूते ॥ नासौ स्वामिना व्यापादयितव्यः किंत्वयमेव तथा सं २
कुर्मो यथा स्वदेहदानमंगीकरोति ॥ सिंहस्तत् श्रुत्वा तूष्णीं स्थितः ॥ ततोसौ लब्धावकाशः
कूटं कृत्वा सर्वान् गृहीत्वा सिंहसमीपं गतः ॥ अथ काकेनोक्तं ॥ देवस्त्राहारेण प्राप्तः अनेको
पवासक्लिष्टश्च स्वामी । तत्सर्वथा मदीयं मांसमुपभुज्यतां ॥ यतः ॥ प्रकृतिः स्वामिना त्यक्ता स

मृद्धापि न जीवति । अपि धन्वंतरिर्वैद्यः किं करोति गतायुषि ॥१॥ स्वामिमूला भवंत्येव सर्वाः
प्रकृतयः खलु । समूलेष्वपि वृक्षेषु प्रयत्नः सफलो भवेत् ॥२॥ सिंहो ब्रूते ॥ भद्र वरं प्राणप
रित्यागो न पुनरीदृशे कर्मणि प्रवृत्तिः । जंबूकेनापि तथा चोक्तं ॥ ततः सिंहेनोक्तं ॥ कदापि नैवं
विधेयं ॥ व्याघ्रेणोक्तं ॥ मद्देहेन जीवतु स्वामी ॥ सिंहेनोक्तं न कदाचिदेतदुचितं ॥ अथ चित्रक
र्णोपि जातप्रत्ययस्तथात्मदेहदानमाह ॥ ततस्तद्वचनेनासौ द्वीपिना कुक्षिं विदार्य व्यापादितः
सर्वैर्भक्षितश्च ॥ अतोहं ब्रवीमि । मतिरित्यादि तदनंतरं तृतीय धूर्तवचनं श्रुत्वा स विप्रः मतिभ्रमं नि
श्चित्य छागं त्यक्त्वा स्नात्वा गृहं ययौ ॥ स च्छागश्च धूर्तैर्नीत्वा खादितः ॥ अतोहं ब्रवीमि ॥ आत्मौ
पम्येनेत्यादि ॥ राजाह ॥ मेघवर्ण कथं त्वया शत्रुमध्ये चिरमुषितं ॥ कथं वा तेषामनुनयः कृतः ॥
मेघवर्ण उवाच ॥ देव स्वामिकार्यार्थिना निजप्रयोजनवशाद्वा किं किं न क्रियते । पश्य ॥ लोको
वहति किं राजन्न मूर्ध्ना दग्धुमिंधनं ॥ क्षालयन्नपि वृक्षांघ्रीन्नदीवेगो निकृंतति ॥१॥ तथा चोक्तं ॥
स्कंधेनापि वहेच्छत्रून्कार्यमासाद्य बुद्धिमान् ॥ यथा वृद्धेन सर्पेण मंडूका विनिपातिताः ॥२॥
राजाह ॥ कथमेतत् ॥ मेघवर्णः कथयति ॥ अस्ति जीर्णोद्याने मंदविसर्पी नाम सर्पः ॥ सोतिजी

हि॰ प र्णतयाहारमन्वेष्टुमक्षमः सरस्तीरे पतित्वा स्थितः॥ ततो दूरादेकेन चिन्मंडूकेन दृष्टः किमिति त्व
१० माहारं नान्विष्यसि॥ सर्पो ब्रूते॥ भद्र गच्छ किं ते मम मंदभाग्यस्य वृत्तांतप्रश्नेन॥ सचोपजा
तकौतुकः सर्वथा कथ्यतामिति तं सर्पमाह॥ सर्पो ब्रूते॥ अरे मत्रपुरे कौंडिन्यनाम्नः श्रोत्रिय
स्य पुत्रो विंशतिवर्षदेशीयः सर्वगुणसंपन्नो दुर्दैवान्मया नृशंसेन दष्टः। ततः सुशीलशर्मा
णमात्मनः पुत्रं मृतमवलोक्य कौंडिन्यः शोकमूर्छितः पृथिवीतले लुलोठ॥ अनंतरं ब्रह्मपु
रनिवासिनः सर्वे बांधवास्तत्रागत्योपविष्टाः॥ तथा चोक्तं॥ आहवे व्यसने चैव दुर्भिक्षे शत्रुवि
ग्रहे। राजद्वारे श्मशाने च यस्तिष्ठति स बांधवः॥ तत्र कपिलो नाम स्नातको ब्रूते॥ अरे कौंडिन्य मू
ढोसि येनैवं विलपसि॥ शृणु॥ क्रोडीकरोति प्रथमं यदा जातमनित्यता। धात्रीव जननी पश्चात्त
दा शोकस्य कः क्रमः॥ अन्यच्च॥ देहिनोस्मिन्यथा देहे कौमारं यौवनं जरा। तथा देहांतरप्राप्तिर्धीर राम ९४
स्तत्र न मुह्यति॥१॥ क्व गतास्ते महीपालाः ससैन्यबलवाहनाः॥ वि॥ वियोगसाक्षिणी येषां भूमिर १०
द्यापि तिष्ठति॥२॥ अपरं च॥ प्रतिक्षणमयं कायः क्षीयमाणो न लक्ष्यते॥ आमकुंभ इवांभःस्थो
विशीर्णः संविभाव्यते॥४॥ आसन्नतरतामेति मृत्युर्जंतोर्दिने दिने॥ आघातं नीयमानस्य

वध्यस्येव पदे पदे॥ अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयं॥ ऐश्वर्यं प्रियसंवासो मुह्येत्तत्र न
पंडितः॥१॥ यथा काष्ठं च काष्ठं च समेयातां महोदधौ॥ समेत्य च व्यपेयातां तद्वद्भूतसमागमः॥२॥
पंचभिः संस्कृते देहे पंचत्वं च पुनर्गते। स्वां स्वां योनिमनुप्राप्ते तत्र का परिदेवना॥३॥ यावतः
कुरुते जंतुः संबंधान्स्नेहहेतुकान्॥ तावतोस्य निखन्यंते हृदये शोकशंकवः॥४॥ नायमत्यंत
संवासो लभते येन केनचित्। अनित्येन शरीरेण किमुतान्येन केनचित्॥५॥ संयोगो हि वियोग वैन ५
स्य संसूचयति संभवं॥ अनतिक्रमणीयस्य जन्ममृत्योरिवागतं॥६॥ आपातरमणीयानां संयो
गानां प्रियैः सह। अपथ्यानामिवान्नानां परिणामो हि दारुणः॥७॥ व्रजंति न निवर्तंते स्रोतांसि
सरितां यथा॥ आयुरादाय मर्त्यानां तथा रात्र्यहनी सदा॥८॥ सुखास्वादलवो योपि संसारे
सत्समागमः स हि योगावसानत्वाद्दुःखानां धुरि युज्यते॥९॥ अत एव हि नेच्छंति साधवः सत्स
मागमं। यद्वियोगासिलूनस्य मनसो नास्ति भेषजं॥१०॥ सुकृतान्येव कर्माणि राजभिः साग
रादिभिः। अथ तानि च कर्माणि तैरेव प्रलयं ययुः॥११॥ संचिंत्य संचिंत्य तमुग्रदंडं मृत्युं मनु

हि०७ घस्यवित्रहरणस्य। वर्षांबुसिक्ताइवचर्मबंधाः सर्वेप्रयत्नाः शिथिलीभवंति॥१२॥ यामेवरात्रिं
११ प्रथमामुपैति गर्भेनिवासंनरवीरलोकः॥ ततःप्रभृत्यस्खलितप्रयाणः संप्रत्ययं मृत्युसमीप
मेति॥१३॥ अतःसंसारं विचारयतां शोकोयमज्ञानस्यप्रपंचः॥ पश्य। अज्ञानंकारणंनस्या
द्वियोगोयदिकारणं। शोकोदिनेषुगच्छत्सुवर्द्धतामपियातिकिं॥१४॥ तदत्रात्मानमनुसंधेहि
शोकचर्चांपरिहर॥ अकांडपातजातानामार्द्राणांमर्मभेदिनां॥ गाढशोकप्रहाराणामचिं
तैवमहौषधं॥१५॥ कौंडिन्यउत्थायब्रवीत्॥ तदहमिदानीं गृहनरकवासेनवरंवनंगमिष्यामि॥ क ३
पुनः कपिलोब्रूते। वनेपिदोषाःप्रभवंतिरागिणां गृहेपिपंचेंद्रियनिग्रहस्तपः॥ अकुत्सितेक
र्मणियःप्रवर्त्तते निवृत्तरागस्यगृहंतपोवनं॥ यतः॥ दुःखितोपिचरेद्धर्मंयत्रतत्राश्रमेरतः॥ राम
समःसर्वेषुभूतेषुनलिंगंधर्मकारणं॥ उक्तंच॥ वृत्त्यर्थंभोजनंयेषांसंतानार्थंचमैथुनं। वाक्स १२
त्यवचनार्थायचदुर्गाण्यपितरंतिते॥१॥ तथाहि॥ आत्मानदीसंयमपुण्यतीर्थासत्योदकाशील
तटादयोर्मिः। अत्राभिषेकंकुरुपांडुपुत्रनवारिणाशुध्यतिचांतरात्मा॥२॥ विशेषतश्च॥ श्लोक। जन्म

मृत्युजराव्याधिवेदनाभिरभिप्लुतं। संसारमिममत्यंतमसारंत्यजतःसुखं॥ यतः॥ दुः
खमेवास्तिनसुखंयस्मात्तदुपलभ्यते। दुःखार्तस्यप्रतीकारेसुखसंज्ञाविधीयते॥ कौं
डिन्योब्रूते॥ एवमेव॥ सर्पोब्रूते॥ ततोहंतेनशोकाकुलेनब्राह्मणेनशप्तः॥ यदद्यप्रभृति
मंडूकानांवाहनंभविष्यसि॥ संप्रतुपदेशसहारेणाप्रविष्टंतेहृदये॥ तत्कार्यं॥ श्लोक॥ संगःस
र्वात्मनात्याज्यःसचेत्त्यक्तुंनशक्यते। ससद्भिःसहकर्तव्यःसतांसंगस्यभेषजं॥१॥ अपिच॥ का
मःसर्वात्मनाहेयःसचेद्धातुंनशक्यते। मुमुक्षांप्रतिकर्तव्यःसैवतस्यापिभेषजं॥ एतच्छ्रुत्वा
सकौंडिन्यउपदेशामृतशांतशोकानलोयथाविधिदंडग्रहणंकृतवान॥ अतोब्रह्मशापं
मोक्तुंमंडूकान्वोढुमहमत्रतिष्ठामि॥ अनंतरंतेनमंडूकेनगत्वामंडूकनाथस्यजालपाद
स्याग्रेतत्कथितं॥ ततःसआगत्यमंडूकनाथःसर्पस्यपृष्ठमधिष्ठितवान॥ ससर्पस्तंपृ
ष्ठेकृत्वाचित्रपदक्रमंबभ्राम॥ ततोऽपरेद्युश्चलितुमसमर्थः॥ तंमंडूकनाथोवदति॥ कि
मितिभवानद्यमंदगतिः॥ सर्पोब्रूते॥ देवाहारेणविनादुर्बलोस्मि। मंडूकनाथोवदति॥

४

हि॰उ॰ अस्मात्तयामंडूकान्भक्षय। सर्पोऽवदत्॥ ततोऽनुगृहीतोऽयं महाप्रसादः॥ इत्युक्त्वा क्रमेण मं
डूकान्खादितवान्॥ अथ निर्मंडूकं सरो विलोक्य समंडूकनाथोऽपि तेन खादितः। अतोऽहं
१२ ब्रवीमि। स्कंधेनापि वहेदित्यादि॥ गृध्र उवाच॥ देवयालिदानीं पुरावृत्ताख्यानकथनं॥ सर्व
थासंधेयोऽसौ राजा हिरण्यगर्भो नाम॥ संधीयतामिति मे मतिः॥ राजोवाच॥ कोऽयं भवतो वि
चारः। यतो जितस्तावदस्माभिः। तद्यद्यस्मत्सेवया वसति तदास्तां नो चेद्विगृह्यतां॥ अत्रां
तरे जंबूद्वीपादागत्य शुकेनोक्तं देव सिंहलद्वीपस्य सारसो राजा संप्रति जंबूद्वीपमाक्रम्या
वितिष्ठति॥ राजा ससंभ्रमं ब्रूते॥ किं किं॥ शुकः पूर्वोक्तं ब्रूते॥ गृध्रः स्वगतं॥ साधु रे चक्रवाक
मंत्रिन् साधु सर्वज्ञ साधु। राजा सकोपं ब्रूते॥ आस्तां तावदयं॥ तमेव गत्वा तावत्समूलयामि॥
ह दूरदर्शी विहस्याह॥ न शरन्मेघवत्कार्यं वृथैव घनगर्जनं॥ परस्यार्थमनर्थं वा प्रकाशय राम
ति नो महान्॥१॥ अन्यच्च॥ एकदा न विगृह्णीयाद्बहून् राजाभिघातिनः। सदर्पोऽप्युरगः कीटै १२
र्बहुभिर्नाश्यते ध्रुवं॥२॥ देव किमिति विना संधानं गमनमस्ति। यतस्तदनेनास्मत्पश्चात्कोपो

जनयितव्यः॥ अपरंच॥ योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः॥ स तथा तप्यते मंदो ब्राह्मणो
नकुलादिव॥१॥ राजा पृच्छति॥ कथमेतत्॥ दूरदर्शी कथयति॥ अस्त्युज्जयिन्यां माधवो
नाम ब्राह्मणस्तस्य ब्राह्मणी प्रसूता॥ सा ब्राह्मणी बालापत्यरक्षार्थं ब्राह्मणमवस्थाप्य
सरः स्नातुं गता॥ अथ ब्राह्मणस्य कृते राज्ञः पार्वणश्राद्धं कारयितुमाह्वानमागतं॥ तच्छ्रु
त्वा ब्राह्मणः सहजदारिद्र्योऽचिंतयत्॥ यदि सत्वरं न गच्छामि तदान्यः कश्चिच्छ्राद्धं
कारयिष्यति॥ उक्तंच॥ आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः। क्षिप्रमक्रियमाणस्य
कालः पिबति तद्रसं॥१॥ बालकस्य चात्र रक्षको नास्ति किं करोमि तावच्चिरकालपालित
मिमं नकुलं सुतनिर्विशेषं बालकरक्षार्थं व्यवस्थाप्य गच्छामि तथा कृत्वा गतः॥ ततस्त
त्र नकुलेन बालकसमीपमागच्छन् कृष्णसर्पो व्यापादितः खादितश्च॥ अथासौ नकु
लो ब्राह्मणमागतमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपगम्य ब्राह्मणस्य चरण
योर्लुलोठ॥ ततोऽसौ ब्राह्मणस्तथाविधं नकुलं दृष्ट्वा मम पुत्रोऽनेन खादित इत्यवधार्य

हि॰उ॰ व्यापादितवान्॥ अनंतरं यावदसावुपसृत्य पश्यति तावत्तत्रासौ बालकः सुखं स्वपिति स
१२ र्पश्च व्यापादितस्तिष्ठति॥ ततोसौ परं विषादमुपगतः॥ अतोहं ब्रवीमि॥ योर्थमित्यादि॥
अपि च देव॥ कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा॥ षड्वर्गमुत्सृजेदेनमस्मिं
स्त्यक्ते सुखी नृपः॥१॥ राजाह॥ मंत्रिन् एष एव निश्चयः॥ मंत्री ब्रूते॥ एवमेव॥ यतः॥ स्म
तेषु परमार्थेषु वि...को नीतिज्ञानविनिश्चयः॥ दृढता मंत्रगुप्तिश्च मंत्रिणः परमो गुणः॥२॥ अ
न्यच्च॥ सहसा विदधीत न क्रियामविवेकः परमापदां पदं॥ वृणते हि विमृश्यकारिणं गुण
लुब्धाः स्वयमेव संपदः॥३॥ तद्यदि देवास्मद्वचनं क्रियते तदा गम्यतां॥ यतः॥ यद्यप्युपाया
श्चत्वारो निर्दिष्टाः साध्यसाधने॥ संख्यामात्रं फलं तेषां सिद्धिः संधौ विधीयते॥१॥ राजाह॥
राजाह॥ कथमेवं सत्वरं संभवति॥ मंत्री ब्रूते॥ देव शीघ्रं भविष्यति॥ यतः॥ मृद्घटवत्सुखभेद्यो राम
दुःसंधानश्च दुर्जनो भवति॥ सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु संधेयः॥२॥ अपरं च॥ १३
अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः॥ ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रंजयति॥

विशेषतश्चासौ सर्वज्ञो मंत्री॥ राजाह॥ ज्ञातमेतन्मया सर्वं मेघवर्णाद्वचनात्तत्कृतकार्यस्पंदनाच्च॥
मंत्री वदति॥ कर्मानुमेयाः सर्वत्र परोक्षगुणवृत्तयः॥ तस्मात्परोक्षवृत्तीनां फलैः कर्म विभाव्यते॥
राजाह॥ अलमुत्तरोत्तरेण॥ यथाभिप्रेतमनुष्ठीयतां॥ एतन्मंत्रयित्वा गृध्रो महामंत्री दुर्गाभ्यंतरं
चलितः॥ चक्रो ब्रूते॥ तत्र यथार्थं ज्ञातुं प्रणिधिः पुनः प्रस्थापितः॥ राजहंसो ब्रूते॥ मंत्रिन्
पुनस्तत्संबंधिना किं न विलंबमागंतव्यं सर्वज्ञोति दूरस्थात्॥ एवं न शंकास्पदमेतत्॥ यतो महाशयो
सो दूरदर्शी॥ अथवा स्थितिरियं मंदमतीनां॥ कदाचिच्छंकैव न क्रियते॥ कदाचित्सर्वत्र शंका॥ त
था हि॥ सरसि बहुशस्ताराछायेक्षणात्परिवंचितः कुमुदविटपान्वेषी हंसो निशासु विच
क्षणः॥ न दशति पुनस्ताराशंकी दिवापि सितोत्पलं कुहकचकितो लोकः सत्येप्यपायमपे
क्षते॥१॥ तद्देव यथाशक्ति तदर्थं रत्नोपहारादिसामग्री सज्जीक्रियतां॥ तथानुष्ठिते॥ गृध्रो
मंत्री दुर्गद्वारि चक्रवाकेण मंत्रिणोपगम्यालिंग्य दत्त्वासनेनोपवेशितः॥ चक्रो ब्रूते॥ महामंत्रिन्
युष्मदायत्तं स्वेच्छया विलप्यतामिदं राज्यं॥ राजहंसो ब्रूते॥ एवमेव॥ दूरदर्शी ब्रूते॥ एवमेवैतत् किंतु॥

हि॰उ॰ इदानीवकुप्रपंचवचनंनिःप्रयोजनं॥ यतः॥ लुब्धमर्थेनगृह्णीयात्स्तब्धमंजलिकर्मणा॥ मूर्खं
छंदानुवृत्तेनयाथातथ्येनपंडितं॥१॥ अन्यच्च॥ सद्भावेन हरेन्मित्रंसद्भावेनचबांधवान्॥ स्त्रीभृ
१४ त्यौदानमानाभ्यांदाक्षिण्येनेतरान्जनान्॥२॥ तदिदानींसंधायप्रस्थाप्यतां। महाप्रतापश्चित्रकर्णो
राजा॥ चक्रोब्रूते॥ यथासंधानकार्यंतदुच्यतां। राजाहंसोब्रूते॥ कतिप्रकाराणिसंधानानिभ
युक्त वंति। गृध्रोवदति॥ कथयामिश्रूयतां॥ बलीयसाभियुक्तस्तुनृपोनन्यप्रतिक्रियः॥ आपन्नःसं
धिमन्विच्छेत्कुर्वाणःकालयापनं॥१॥ कपालउपहारश्चसंतानःसंगतस्तथा। उपन्यासःप्रतीका
रःसंयोगःपुरुषांतरं॥२॥ अदृष्टनरआदिष्टआत्मामिषउपग्रहः॥ परिक्रयस्तथाछिन्नस्तथापर
भूषणः॥३॥ स्कंधोपमेयसंधिश्चषोडशःपरिकीर्तितः॥ इतिषोडशकंप्राहुःसंधिंसंधिविचक्षणाः॥ राम
४॥ कपालसंधिर्विज्ञेयःकेवलंसमसंधितः॥ संप्रदानाद्भवतियउपहारःसउच्यते॥५॥ सं १४
तानःसंधिर्विज्ञेयोदारिकादानपूर्वकः॥ सद्भिःसंगतसंधिस्तुमैत्रीपूर्वउदाहृतः॥६॥ यावदायुः
प्रमाणस्तुसमानार्थप्रयोजनः॥ संपत्तौवाविपत्तौवाकारणैर्योनभिद्यते॥७॥ संगतःसंधिरेवेरु

प्रकृष्टत्वात्सुवर्णवत्॥ अपरैःसंधिकुशलैःकांचनःसउदाहृतः॥८॥ आत्मनःकार्यसिद्धिंतुसमु
द्दिश्यक्रियतेयः॥ सउपन्यासकुशलैरुपन्याससउदाहृतः॥९॥ मयास्योपकृतंपूर्वंममापिप्रकरि
ष्यति। इतियःक्रियतेसंधिःप्रतीकारःसउच्यते॥१०॥ उपकारंकरोम्यस्यममाप्येषकरिष्यति॥ अयंचा
पिप्रतीकारोरामसुग्रीवयोरिव॥११॥ एकार्थंसम्यगुद्दिश्यक्रियांयत्रहिगच्छतः॥ सुसंहितप्रया
णस्तुसचसंयोगउच्यते॥१२॥ आवयोर्योधमुख्यैस्तुमदर्थःसाध्यतामिति॥ यत्रशत्रुःपणःकु
र्यात्सोदृष्टपुरुषःस्मृतः॥१३॥ यत्रभूम्येकदेशेनपणेनरिपुर्जितः॥ संधीयतेसंधिविद्भिरादिष्टः
सउदाहृतः॥१४॥ स्वसैन्येनतुसंधानमात्मामिषइतिस्मृतः॥ क्रियतेप्राणरक्षार्थंसर्वदानमुप
ग्रहः॥१५॥ येनकेनापिकुप्येनसर्वकुप्येनवापुनः। शिष्टस्यप्रतिरक्षार्थंपरिक्रयउदाहृतः॥
१६॥ भुवांसारवतीनांतुदानाद्छिन्नउच्यते॥ सर्वभूम्यर्थदानेनफलेनपरभूषणः॥१७॥ प
रिच्छिन्नंफलंयत्रप्रतिस्कंधेनदीयते॥ स्कंधोपनेयंतंप्राहुःसंधिंसंधिविचक्षणाः॥१८॥ परस्प
रोपकारस्तुमैत्रीसंबंधकस्तथा॥ उपहारश्चविज्ञेयाश्चत्वारस्त्वेवसंधयः॥१९॥ एकएवोपकार
स्तुसंधिरेतैन्मयोहिमः॥ उपकारस्यभेदास्तुसर्वेतेमित्रवर्जिताः॥२०॥ अ[illegible]काबली

हि०उ० यान्स्यार्लब्ध्वान निवर्त्तते ॥ उपहाराद्दृते तस्मात्संधिरन्यो न विद्यते ॥ २१ ॥ [illegible] ॥ अयं
निजः परो वेति गणना लघुचेतसां ॥ उदारचरितानां तु वसुधैव कुटुंबकं [illegible] ॥ २२ ॥ अपरं च ॥ मातृव
१५ त्परदारेषु परद्रव्येषु लोष्टवत् ॥ आत्मवत्सर्वभूतेषु यः पश्यति स पंडितः ॥ २३ ॥ यूयं च महा
पंडिताः ॥ तदस्माकं यथाकार्यमुपदिश्यतां ॥ मंत्री ब्रूते ॥ आः किमेवमुच्यते ॥ आधिव्याधिपरि
तापाद्द्यः श्वो वा विनाशिने ॥ को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ २४ ॥ जलांतश्चंद्रच
पलं जीवितं खलु देहिनां ॥ तथाविधमिति ज्ञात्वा शश्वत्कल्याणमाचरेत् ॥ २५ ॥ मृगतृष्णासमं वी
क्ष्य जगत्क्षणभंगुरं ॥ सज्जनैः संगतं कुर्याद्धर्माय च सुखाय च ॥ २६ ॥ तन्मम सम्मतेन तथैव तत्
क्रियतां ॥ यतः ॥ अश्वमेधसहस्राणि सत्यं च तुलया धृतं ॥ अश्वमेधसहस्राद्धि सत्यमेवातिरि
च्यते ॥ २७ ॥ अतः सत्याभिधानं वचनं दिव्यं पुरःसरं द्वयोरप्यनयोर्भूपालयोः कांचनाभिधानः सं
धिर्विधीयतां ॥ सर्वज्ञो ब्रूते ॥ एवमस्तु ॥ ततोनेन वस्त्रालंकारोपहारैः स मंत्री दूरदर्शी पूजितः ॥ राम
प्रहृष्टमना चक्रवाकं गृहीत्वा राज्ञो मयूरस्य समीपं गतः ॥ तत्र तेन चित्रवर्णेन राज्ञा स सर्वज्ञो गृ १५
ध्रवचनाद्बहुमानदानपुरःसरं संभाषितः ॥ मंत्री संधिं स्वीकृत्य [illegible] द्वितीयो राजहंसस्य

हि०उ० सं० ४
हिरण्यगर्भस्य राजहंसकटकं प्रस्थापितः ॥ देव [illegible] समीहितं [illegible] इदानीं ॥ अथ
विष्णुशर्मा [illegible] राजपुत्राः मनोभिलषितं सुखमनुभवंतीति ॥ विष्णुशर्मा [illegible] ॥ अपरं किं कथयामि तदु
च्यतां ॥ राजपुत्रा ऊचुः ॥ आर्य भगवत्प्रसादाद्राज्यव्यवहारांगं ज्ञातं ॥ सुखिनो भूता वयं ॥
विष्णुशर्मोवाच ॥ [illegible] परमिदमस्तु ॥ संधिः सर्वमहीभुजां विजयिनामस्तु प्रमोदः सदा
संतः संतु निरापदः सुकृतीनां कीर्तिश्चिरं वर्द्धतां ॥ नीतिर्वारविलासिनीव सततं वक्षःस्थले सं
स्थिता वक्त्रं चुंबतु मंत्रिणामहरहर्भूयान्महानुत्सवः ॥ १ ॥ अन्यच्चास्तु ॥ प्रालेयाद्रेः सुतायाः प्रण
यिनिवसतिश्चंद्रमौलिः स यावद्यावल्लक्ष्मीर्मुरारेर्जलद इव तडिन्मानसे विस्फुरंती ॥ यावत्स्व
र्णाचलोयं दवदहनसमो यस्य सूर्यः स्फुलिंगस्तावन्नारायणेन प्रचरतु रचितः संग्रहोयं कथानां ॥
१६ २ ॥ अपरं च ॥ श्रीमान्धवलचंद्रोसौ जीयान्मांडलिको रिपून् ॥ येनायं संग्रहो यत्नाल्लेखयित्वा प्र राम
चारितः ॥ ३ ॥ ॥ इति श्री हितोपदेशे संधिर्नाम [illegible] कथासंग्रहः समाप्तः ॥ श्री रामाय ॥ १६
श्रीरामचंद्रचरणौ कमलासनं चेतसा [illegible] ॥ रामचंद्र [illegible] श्री [illegible]
सुखास्तु सतां सदा ॥ १ ॥ ग्रंथ १७५० ॥ रामेश्वरय्या [illegible]

[illegible] पुत्राणां [illegible] शास्त्राणां मन्दस्थानेनो [illegible]
[illegible] कोथं [illegible] नदि [illegible] धार्मिकः। कारणेन [illegible] किंच [illegible]
[illegible] येन जातेन [illegible] वंशः समुद्धृतिं। परिहृन्ति लिसंसारे [illegible]
[illegible] [illegible] गराग [illegible] तिलकं [illegible] ठिनी [illegible] मायस्य। तेन [illegible]
[illegible] कीदृशी भवति। अपिच॥ [illegible] तीर्थं कृतं येन तपः काप्यति दुःकरं। तस्य पुत्रो भवेद् [illegible]
मूढे [illegible] धार्मिक [illegible] पुत्री॥ [illegible] गतो नित्यमरोगिता च प्रियाच [illegible] दिनीद [illegible]
[illegible] विद्या। [illegible] लोके [illegible] निताता एकेनापि सुपुत्रेण। विद्यायुक्तेन साधु
[illegible] [illegible] चन्द्रेणेव प्रकाश्यते॥ [illegible] [illegible] प्रथितं [illegible]
[illegible] क्रियतां यथोच्यते [illegible]
[illegible] मेवच। [illegible] गर्भस्थस्यैव देहिनः॥ किंच॥ [illegible]
[illegible] शयने हरे॥ [illegible] यदभावि [illegible]

१२

हि॰उ न्नतदन्यथा। इति चिंताविषघ्नोयमगदः किन्न पीयते॥ एतत्कार्याक्षमाणां केषांचिदालस्यवचनं यतः

यथा ह्येकेन चक्रेण न रथस्य गति भवेत्॥ एवं पुरुषकारेण विना दैवं न सिध्यति॥ पूर्वजन्मकृतं क

२ र्मतद्दैवमिति कथ्यते। तस्मात्पुरुषकारेण यत्नं कुर्यादतंद्रितः॥ यथा मृत्पिंडतः कर्त्ता कुरुते यद्य

दिच्छति। एवमात्मकृतं कर्म मानवः प्रतिपद्यते॥ अपरञ्च॥ काकतालीयवत्प्राप्तं दृष्ट्वापि निधि

मग्रतः। न स्वयं दैवमादत्ते। पुरुषार्थमपेक्षते॥ तथा चोक्तं॥ माता शत्रुः पिता वैरी। बालो येन

न पाठितः। न शोभते सभामध्ये बको यथा॥ एतच्चिंतयित्वा॥ स राजा पंडितसभां कारितवान्। रा

जोवाच॥ भो भो पंडिताः श्रूयतां। अस्ति कश्चिदेवंभूतः। यो नाम मम पुत्राणां नित्यमुन्मार्ग

गामिनां नीतिशास्त्रोपदेशेन पुनर्जन्म कारिष्यति॥ यतः काचः कांचनसंसर्गात्। धत्ते मा

रकतीं द्युतिं। तथा सत्संनिधानेन। मूर्खो याति प्रवीणतां॥ हीयते हि मतिस्तात हीनैः सह समा राम

गमात्। समैश्च समतामेति विशिष्टैश्च विशिष्टतां॥ अत्रांतरे विष्णुशर्मा नाम महापंडितः सक २

लनीतिशास्त्रतत्वज्ञो बृहस्पतिरिवाब्रवीत्॥ देव महाकुलसंभवा एते राजपुत्रा नीतिं ग्राहितुं

शक्यते। यतः। नाद्रव्ये निहिता काचित्क्रिया फलवती भवेत्। न व्यापारशतेनापि शुकवत्पठ्यते

बकः॥ अन्यच्च॥ अस्मिन्ननिर्गुणं गोत्रे अपत्यमुपजायते। आकरे पद्मरागाणां। जन्म काचम

णेः कुतः॥ अतः षण्मासाभ्यंतरेन व पुत्रान्नीतिशास्त्राभिज्ञान् चतुरानहं करोमि॥ राजा स

४ह विनयं पुनरुवाच॥ कीटोपि सुमनःसंगादारोहति सतां शिरः। अश्मापि याति देवत्वं महद्भिः सु

प्रतिष्ठितः॥ अन्यच्च॥ यथोदयगिरेर्द्रव्यं संनिकर्षेण दीप्यते तथा सत्संनिकर्षेण हीनवर्णोपि

दीप्यते॥ तदेतेषामस्मत्पुत्राणामुपकाराय अधुना भवंतः प्रमाणमित्युक्त्वा तस्य विष्णुशर्मणः रामाः नमः

सबहुमानं सरं। राजपुत्रान्समर्पितवान्। अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणामग्र

तः प्रस्तावक्रमेण स पंडितोऽब्रवीत्॥ काव्यशास्त्रविनोदेन कालो गच्छति धीमतां। व्यसनेन

तु मूर्खाणां निद्रया कलहेन वा॥ तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथया

मि। राजपुत्रैरुक्तं॥ कथ्यतां॥ विष्णुशर्मोवाच॥ शृणुत। संप्रति मित्रलाभः प्रस्तूयते। यस्या

यमाद्यश्लोकः॥ असाधना वित्तहीना बुद्धिमंतः सुहृत्तमाः। साधयंत्याशु कार्याणि। काक

हि० उ कूर्ममृगाखवः। राजपुत्रा ऊचुः। कथमेतत्। सोऽब्रवीत्। अस्ति गोदावरीतीरे। विशालः शाल्मलीतरुः। त
त्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसंति। अथ कदाचिदवसन्नायां रजन्यां चरमाचलचूलाव
३ लंबिनि भगवति कुमुदिनीनायके चंद्रमसि लघुपतनकनामा वायसः प्रबुद्धः। स कृतांतमिव द्विती
यमायांतं व्याधमपश्यत्। तमालोक्याचिंतयत्। अद्य प्रातरेवानिष्टदर्शनं जातं। न जाने पुनरद्य किमभीष्टं द
र्शयिष्यतीत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः। यतः। शोकस्थानसहस्राणि भयस्थानशता
नि च। दिवसे दिवसे मूढमाविशंति न पंडितं॥ विषयिणामिदमवश्यं नैव कर्त्तव्यं। उत्थायोत्थाय बोधव्यं म
हद्भयमुपस्थितं। मरणव्याधिशोकानां किमद्य निपतिष्यति। अथ तेन व्याधेन तंडुलकणान् व
कीर्य जालं विकीर्णमवलोकितं। तस्मिन्नेव काले चित्रग्रीवो नाम कपोतराजः सपरिवारो वियति वि राम ३
सर्पंस्तांस्तंडुलकणानवलोकयामास। ततस्तंडुलकणलुब्धान्कपोतान्दृष्ट्वा प्रत्याह कपो
तराजः। कुतोऽत्र निर्जने वने तंडुलकणानां संभवः। तन्निरूपयामि तावत्। भद्रमिदं पश्यामि प्राये
णानेन तंडुलकणलोभेनास्माभिरपि तथा भवितव्यं॥ कंकणस्य तु लोभेन मग्नः पंके सुदुस्तरे। हे

हव्याघ्रेण संप्राप्तः पथिकः सम्तोय[illegible] यथा। कपोता ऊचुः। कथमेतत्। सोऽब्रवीत्। अहमेकं
दा दक्षिणारण्ये चरन्नपश्यं। एको वृद्धव्याघ्रः स्नातः कुशहस्तः। सरस्तीरे ब्रूते। भो भो पांथा इदं
सुवर्णकंकणं गृह्यतां। ततो लोभाकृ[illegible]ष्टेन केनचित्पांथेनालोचितं। भाग्येनैतदपि संभव
ति किंत्वस्मिन्नर्थसंदेहे प्रवृत्तिर्न विधिः। यतः। अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।
यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे॥ किंतु सर्वत्रार्थार्जने प्रवृत्तौ संदेह एव। तथा
चोक्तं॥ न संशयमनारुह्य नरो भद्राणि पश्यति। संशयं [illegible] पुनरारुह्य यदि जीवति पश्यति॥
तन्निरूपयामि। तावत्प्रकाशं ब्रूते। कुत्र तव कंकणं। व्याघ्रो हस्तं प्रसार्य दर्शयति। पांथोऽव
दत्। कथं त्वयि विश्वासः। व्याघ्र उवाच। इदानीमप्यहं स्नानशीलो दाता वृद्धो गतनखदंतः
कथं न विश्वासभूमिः। यतः। इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा। अलोभ इति मार्गो
ऽयं धर्मस्याष्टविधः स्मृतः॥ तत्र पूर्वचतुर्वर्गो दंभार्थमपि सेव्यते। उत्तरस्तु चतुर्वर्गो नामहा
त्मसु तिष्ठति। अपि च शृणु रे पथिक मम सर्वं मम चैतावान्लोभविरहोऽपि तत्स्वहस्तगतमपि सु

वर्णकंकणं यस्मै कस्मैचिद्दातुमिच्छामि किंतु। व्याघ्रो मनुष्यं खादतीति। तथापि लोकापवादो दु
र्निवारः॥ यतः गतानुगतिको लोकः कुट्टनीमुपदेशिनीं। प्रमाणयति नो धर्मे यथा गोघ्नमपि
द्विजं॥ मयापि धर्मशास्त्राण्यधीतानि शृणु॥ प्राणा यथात्मनोभीष्टा भूतानामपि ते तथा। आ
त्मौपम्येन पुरुषः प्रमाणमधिगच्छति॥३॥ त्वं च दुर्गतः तेन तत्तुभ्यं दातुं सयत्नोहं। तथा ह्युक्तं।
देहि दरिद्रान्भर कौंतेय मा प्रयच्छेश्वरे धनं। व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः॥ अन्यच्च॥
दातव्यमिति यद्दानं दीयतेनुपकारिणे काले देशे च पात्रे च तद्दानं सात्विकं स्मृतं॥ तत्र सरसि
स्नात्वा सुवर्णकंकणमिदं प्रतिगृहाण। ततो यावदसौ सरः स्नातुं प्रविशति तावन्महापंके नि
मग्नः पलायितुमक्षमः। शनैःशनैरुपगम्यमानेन व्याघ्रेणाधृतोऽचिंतयत् न धर्मशास्त्रं पठ
तीति कारणं न चापि वेदाध्ययनं दुरात्मनः। स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं ग राम
वां पयः॥ किंच॥ अवशेंद्रियचित्तानां हस्तिस्नानमिव क्रिया। दुर्भगाभरणप्रायो ज्ञानं भारः क्रि ४
यां विना। तन्न मया भद्रं कृतं। यदत्र हिंसके विश्वासः कृतः॥ तथा ह्युक्तं। सर्वस्य हि परीक्ष्यंते स्वभा

वो नेतरे गुणाः। अतीत्य हि गुणान्सर्वान्स्वभावो मूर्द्ध्नि वर्त्तते। इति चिंतयन्नेवासौ व्यापादितः॥
अतोहं ब्रवीमि। कंकणस्येत्यादि। तत्सर्वथा अविचारितं न कर्त्तव्यं॥ तथा चोक्तं। सुजीर्णमन्नं सु
विचक्षणः सुतः सुशासिता स्त्री नृपतिः सुसेवितः सुचिंत्य चोक्तं सुविचार्य यत्कृतं। सुदीर्घकाले
पि न याति विक्रियां॥१॥ एतत् श्रुत्वा कपोतानां मध्ये सदर्पः कश्चिदुवाच। आः किमेवमुच्यते। वृ
द्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते सर्वत्रैवं विचारेण भोजनेप्यप्रवर्त्तनं॥ यतः शंकाभिः
सर्वमाक्रांतमन्नं पानं च भूतले निवृत्तिः कुत्र कर्त्तव्या। जीवितव्यं कथं नु वा॥२॥ तथा चोक्तं॥ ईर्ष्यी
घृणी त्वसंतुष्टः क्रोधनो नित्यशंकितः परभाग्योपजीवी च षडेते नित्यदुःखिनः॥३॥ तच्छ्रुत्वा
सर्वे कपोतास्तत्रोपविष्टाः यतः सुमहांत्यपि शास्त्राणि धारयंतो बहुश्रुताः छेत्तारः संशयानां च
क्लिश्यंते लोभमोहिताः॥४॥ अनंतरं सर्वे तत्र चलितजालेन बद्धाः यस्य वचनात्तत्रावलंबिता
स्तं सर्वे तिरस्कुर्वंति। तथा ह्युक्तं। न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलं। यदि कार्यविप
त्तिः स्यान्मुखरस्तत्र हन्यते। तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच। नायमस्य दोषः आपदामा
पतंतीनां हितोप्यायाति हेतुतां। मातृजंघा हि वत्सस्य स्तंभीभवति बंधने॥१॥ स बंधुर्यो विपन्ना

नामापद्दूरागमः। नहुर्विहितातीत। वस्तूपालंभपंडितः॥ विपत्काले विस्मयसेवाकापुरुषस्य ल
हि॰ उ॰ क्षणं। तदत्र धैर्यमवलंब्य प्रतीकारश्चिंत्यतां। यतः विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता
५ युधि विक्रमः। यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनां॥१॥ षड्दोषाः पुरुषेणेह
हातव्या भूतिमिच्छता। निद्रा तंद्रा भयं क्रोधं आलस्यं दीर्घसूत्रता॥२॥ इदानीमप्येवं क्रियतां। सर्वैरेक
चित्तीभूय जालमिदं अपक्रियतां। यतः संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि। तुषेणापि परित्य
क्ताः तंडुला न प्ररोहंति॥ अन्यच्च॥ अल्पानामपि वस्तूनां संहतिः कार्यसाधिका। तृणैर्गुणत्वमा
पन्नैर्बध्यंते मत्तदंतिनः॥२॥ इति विचिंत्य पक्षिणः सर्वे जालमादायोत्पतिताः अनंतरं स व्याधः सुदूरं॥
जालापहारकांस्तानवलोक्य पश्चाद्धावितोऽचिंतयत्॥ संहतास्तु हरंतीमे जालं मम विहंगमाः यदा
तु विवदिष्यंति वशमेष्यंति मे तदा। ततश्चक्षुर्विषयी ...ग्रीवो... तिक्रांतेषु पक्षिषु। व्याधो निव राम ५
त्तः। लुब्धकं व्याहतमवलोक्य। कपोता ऊचुः॥ किमिदानीं युक्तं। चित्रग्रीवो ब्रूते। माता मित्रं पिता
चेति स्वभावात्त्रितयं हितं। कार्यकारणतश्चान्ये भवंति हितबुद्धयः॥१॥ तदस्माकं मित्रं हिरण्य
को नाम मूषकराजो गंडकीतीरे चित्रवने निवसति। सोऽस्माकं पाशान् छेत्स्यति। इति॥ आलो

च्य सर्वे हिरण्यकविवरसमीपं गताः॥ हिरण्यकस्तत्र सर्वदापायशंकया शतद्वारो विवरं कृत्वा
निवसति। ततः कपोतावपातचकितस्तूष्णीं स्थितः। चित्रग्रीवोऽवदत्। सखे हिरण्यक किमस्मा
न्न संभाषसे। हिरण्यकस्तद्वचनमभिज्ञाय ससंभ्रमं बहिर्निःसृत्याब्रवीत्। आ पुण्यवानस्मि
प्रियसुहृन्मे चित्रग्रीवः पाशबद्धांश्च ताननवलोक्य सविस्मयः क्षणं स्थित्वोवाच॥ सखे किमेतत्॥
चित्रग्रीवोऽवदत् मित्र किमन्यत्॥ अस्माकं प्राक्तनजन्मदुःकृतेश्चेष्टितं। यतः। रोगशोकपरी
तापबंधनव्यसनानि च। आत्मापराधवृक्षाणां फलान्येतानि देहिनां। तच्छ्रुत्वा हिरण्यकश्चित्रग्रीव
स्य बंधनं छेत्तुं सत्वरमुपसर्पति। चित्रग्रीवो ब्रूते मित्र मा चैवं। एषामस्मदाश्रितानां पाशांस्तावच्छिंधि।
हिरण्यकोऽप्याह। अहमल्पशक्तिर्दंताश्च मे कोमलास्तस्मादेतान् पाशान् छेत्तुं कथमहं समर्थो भ
वामि। तद्यावन्मे दंता न त्रुट्यंति तावत्तव पाशान् छिनद्मि। तदनंतरं तेषामपि बंधं छेत्स्यामि।
चित्रग्रीवोऽवदत्। अस्त्येवं॥ तथापि सत्यमेव। यथाशक्ति बंधनान्यपनय। हिरण्यकेनोक्तं
आत्मपरित्यागेन यदाश्रितानां रक्षणं भवति। तन्न नीतिविदां सम्मतं। आपदर्थे धनं रक्षेद्दारान्

रक्षेत्धनैरपि। आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥ १॥ अपरं च। धर्मार्थकाममोक्षाणां प्राणाः संस्थि
तिहेतवः। तान्निघ्नता किं न हतं रक्षिता किं न रक्षितं। २॥ चित्रग्रीवोऽवदत्। सखे नीतिस्तावदी
दृश्येव किंतु ममाश्रितानां दुःखं सोढुमसमर्थः॥ अपरं च॥ धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृ
जेत्। संनिमित्ते वरं त्यागो विनाशे नियते सति। अयमपरश्चासाधारणो हेतुः। जातिद्रव्यबलानां च
साम्यमेषां मया सह। मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति॥ अन्यच्च॥ विना वर्त्तनमेवैते न त्यजं
ति ममांतिकं। तन्मे प्राणव्ययेनापि जीवयैतान्ममाश्रितान्। किंच मांसमूत्रपुरीषास्थिनिर्मिते
मम शरीरे विनश्वरे नका ग्यास्था यशः पालय मित्र मे पश्य। यदि नित्यमनित्येन निर्मलं मलवाहिना।
यशः कायेन लभ्येत न तल्लब्धं भवेन्नु किं। शरीरस्य गुणानां च दूरमत्यंतमंतरं। शरीरं क्षणविध्वंसि
कल्पांतस्थायिनो गुणाः॥ ३॥ इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नुवाच॥ साधु मि राम
त्र साधु अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते। एवमुक्त्वा सर्वेषां बंधना ६
नि छिन्नानि। हिरण्यकः सर्वान् संपूज्य सादरमाह॥ सखे चित्रग्रीव सर्वथात्र जालबंधनविधौ

मतिदोषमाशंक्यात्मन्यवज्ञा न कर्त्तव्या। यतः। योधिकाद्योजनशतात्पश्यतीहामिषं खगः। स एव प्रा
प्तकालस्तु पाशबंधं न पश्यति॥ अपि च॥ शशिदिवाकरयोर्ग्रहपीडनं गजभुजंगमयोरपि बंधनं।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः॥ अन्यच्च॥ व्योमैकांतविहारिणोपि विह
गाः संप्राप्नुवंत्यापदं। बध्यंते निपुणैरगाधसलिलान्मीनाः समुद्रादपि। दुर्नीतं किमिहास्ति किंसु
चरितं। कः स्थानलाभे गुणः कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि। इति प्रबोध्याति
थ्यं कृत्वालिंग्य चित्रग्रीवः। संप्रेषितो यथेष्टदेशान् सपरिवारो ययौ। हिरण्यकः स्वविवरं प्रवि
ष्टः। अथ लघुपतनकोपि सर्ववृत्तांतदर्शी साश्चर्यमिदमाह॥ अहो हिरण्यक श्लाघ्योसि। अह
मपि त्वया सह मैत्रीमिच्छामि। ततो मां मैत्र्येणानुगृहीतुमर्हसि। तच्छ्रुत्वा हिरण्यको विवराभ्यंतरा
दाह। कस्त्वं। स ब्रूते लघुपतनको नाम वायसोहं। विहस्य हिरण्यको ब्रूते। का त्वया सह मैत्री।
यतः। यद्येन युज्यते लोके बुधस्तत्तेन योजयेत्। अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति।
अपरं च॥ भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत्। शृगालात्पाशबद्धोसौ मृगः काकेन र
क्षितः॥ वायसो ब्रूते॥ कथमेतत्॥ हिरण्यकः कथयति। अस्ति मगधदेशे चंपकवती नामार

राम
सत्य
सास
हि.उ.

रण्यानी। तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टां
गः केनचिच्छृगालेनावलोकितः। तमालोक्याचिंतयत्। आः कथमेतन्मांसं सुललितं भक्ष
यामि। तावद्विश्वासमुत्पादयामीत्यालोच्योपसृत्याब्रवीत्। मित्र कुशलं ते। मृगेणोक्तं। क
स्त्वं। जंबूको ब्रूते। क्षुद्रबुद्धिनामा जंबुकोहं। अत्रारण्ये बंधुहीनो निवसामि। इदानीं त्वां मित्रं
समासाद्य पुनः सबंधु जीवलोकं प्रविष्टोस्मि। अधुना तवानुचरेण सर्वदा मया भवितव्यमिति।
ततस्तावदस्तंगते भगवति मरीचिमालिनि मृगजंबुकौ वपिवासभूमिं गतौ। तत्र चंपकवृक्ष
शाखायां सुबुद्धिनामा काको मृगस्य मित्रं निवसति। काको ब्रूते। सखे मृग कोयं द्वितीयः। मृगो
ब्रूते। जंबुकोयं। अस्मत्सख्यमिच्छन्नागतः। काको ब्रूते। मित्र अकस्मादागंतुकेन सह विश्वासो
न युक्तः। तथा चोक्तं॥ अज्ञातकुलशीलस्य वासो देयो न कस्यचित्। मार्जारस्य हि दोषेण हतो गृ
ध्रो जरद्गवः॥ तावाहतुः। कथमेतत्। काकः कथयति। अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते। सुमहान्
पर्कटीवृक्षः। तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति। त
जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किंचित्किंचिद्ददति। तेनासौ जीवति। अथ कदाचित्।

राम

पत्रि १

दीर्घकर्णो नाम मार्जारः शावकान् भक्षितुं तत्रागतः। तमायांतं दृष्ट्वा पक्षिशावकैर्भयाकु
लैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तं कः समायाति। दीर्घकर्णो गृध्रमालोक्य सभयं
हा हतोस्मि। अधुनासंनिधाने पलायनमप्यशक्यं तद्यथा प्राप्तव्यं। स भवतु तत्समी
पं गच्छामीत्यालोच्योपसृत्याब्रवीत्। आर्य त्वामभिवंदे। गृध्रो वदति। कस्त्वं। सोब्रवीत्। मा
र्जारोहं। गृध्रो ब्रूते। दूरमपसर नो चेद्धंतव्योसि मया। मार्जारो वदति। श्रूयतां तावद्वचनं। ततो यद्यहं
वध्यस्तदा हंतव्यः। यतः। जातिमात्रेण कः केन हन्यते पूज्यते क्वचित्। व्यवहारं परिज्ञाय वध्यः पू
ज्योऽथवा भवेत्॥ गृध्रो ब्रवीति। ब्रूहि। सोऽवदत्। अहमत्र गंगातीरे नित्यस्नायी। निरामिष
ब्रह्मचर्येण चांद्रायणव्रतमाचरंस्तिष्ठामि। युष्मांश्च धर्मज्ञानरतान्। विश्वासपात्राणीति प
क्षिणः सर्वदा ममाग्रे स्तुवंति। अतो भवद्भ्यो विद्यावयोवृद्धेभ्यः धर्मं श्रोतुमिहागतः। भवंतश्चै
तादृशाः धर्मज्ञा यन्मामतिथिं हंतुमुद्यताः। गृहस्थधर्मश्चैषः॥ अरावप्युचितं कार्यमातिथ्यं गृह
मागते। छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः। यद्यन्नं नास्ति तदा प्रीतेन वचसा तावदतिथि
पूज्यः। यतः। तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यंते कदा।

न॰ अपरंच। निर्गुणेष्वपिसत्त्वेषु दयांकुर्वंतिसाधवः। नहिसंहरतेज्योत्स्नां चंद्रश्चांडालवेश्मनि॥
हि॰ ५ गृध्रोऽवदत्। मार्जारोहि मांसरुचयः। पक्षिबालका वसंति नैवं ब्रवीमि। मार्जारो भूमिं स्पृ
८ ष्ट्वाकर्णौ स्पृशति मयाधर्मशास्त्रं श्रुत्वा। वीतरागेणेदं दुष्करव्रतमध्यवसितं। यतः परस्परं विव
दमानानामपि प्रमाणस्य शास्त्राणामहिंसापरमोधर्म इत्यत्रैकमत्यं श्रुतं। यथा च। सर्वहिंसा
निवृत्ता येनराः सर्वसहाश्च ये। सर्वस्याश्रयभूताश्च। तेनराः स्वर्गगामिनः। एकएव सुहृद्धर्मो
निधनेप्यनुयाति यः। शरीरेणसमं नाशं सर्वमन्यत्तु गच्छति। योऽत्ति यस्य यदा मांसमुभयो
पश्यतांऽतरं एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते॥ अपिच। मर्तव्यमिति यद्दुःखं पुरुषस्यो
पजायते। शक्यस्तेनानुमानेन। परोपि परिरक्षितुं॥ मृगशृगालवत्॥ स्वच्छंदवनजातेन शाकेना
पिप्रपूर्यते। अस्यदग्धोदरार्थे कः कुर्यात्पातकं नरः॥ एवं विश्वास्य तत्र तरुकोटरे स्थितः॥ त
तो दिनेषु गच्छत्सु पक्षिशावकानानीय तरुकोटरे तान् खादति। अथ येषामपत्यानि खादितानि राम
तैश्शोकार्त्तैर्विलपद्भिर्जिज्ञासं समारब्धं। परिज्ञाय मार्जारः। कोटरान्निःसृत्य पलायितः। पश्चा ८
तौ निरूप्य तद्भिश्च पक्षिभिस्तरुकोटरे शावकास्थीनि प्राप्तानि। ततश्चानेन शावकाः खादिताः

तिनिश्चित्य तैः पक्षिभिर्मिलित्वा स गृध्रो व्यापादितः। अतोऽहं ब्रवीमि। अज्ञातकुलशीलस्ये
त्यादि॥ इत्याकर्ण्य स जंबुकः सकोपमाह॥ मृगस्य प्रथमदर्शने भवानप्यज्ञातकुलशील एव।
तत्कथं भवद्भिः सहैतस्य ---- यावत्स्नेहानुवृत्तिरुत्तरोत्तरं वर्त्तते॥ अन्यच्च॥ अयं निजः परो
वेत्ति गणना लघुचेतसां। उदारचरितानां तु वसुधैव कुटुंबकं॥ यथा चायं मृगो मम बंधुस्तथा
त्वमपि। मृगो ब्रवीत्। किमनेनोत्तरोत्तरेण। सर्वैरेकत्र विश्रंभालापसुखिभिः स्थीयतां।
काको ब्रूते। एवमस्तु। ततः प्रातः सर्वे यथाभिमतदेशं गताः। एकदा तेन जंबुकेन सुभृतमुक्तं।
सखे मृग। एतस्मिन्वनैकदेशे सस्यसंपूर्णं क्षेत्रमेकमस्ति। तदहं त्वां नीत्वा दर्शयामि।
तथा चाकृते सति स मृगः प्रत्यहं सस्यं खादतीति क्षेत्रपतिना तं दृष्ट्वा पाशास्तत्र योजिताः।
तदनंतरं पुनरागतो मृगः पाशैर्बद्धोऽचिंतयत्। को मामस्मात्कालेयमपाशादिव व्याधपा
शात्त्रातुं मित्रादन्यः समर्थो भवति। तत्रांतरे जंबुकस्तत्रागतोऽचिंतयत्। फलितं तावदस्माकं
कपटप्रबंधेन मनोरथसिद्धिरपि। बाहुल्येन मे भविष्यति। किं बहुना। एतज्ज्ञात्वा स्योत्कृत्य म

हि·उ

८

नस्य मांसासृग्लिप्तान्यस्थीनि मया प्राप्तव्यानि। मृगस्तं दृष्ट्वा दीनो ब्रूते। सखे छिंधि मम बं
धनं। सत्वरं त्रायस्व मां॥ आपत्सु मित्रं यानीयाद्युधे शूरं धने शुचिं। भार्यां क्षीणेषु वित्तेषु। व्यस
नेषु च बांधवान्॥ जंबुकः पाशान्विलोक्याचिंतयत्। दृढं तावदयं बंधः। ब्रूते च। सखे स्नायुनिर्मिता ए
ते पाशाः। तदद्य भट्टारकवारे कथमेतान्दंतैः स्पृशामि। मित्र नान्यथा मन्यसे। प्रभाते च यत्त्वया
वक्तव्यं तन्मया कर्तव्यमिति। तदनंतरं काकः प्राप्तिकाले तं मृगमनागतमवलोक्यान्विष्य च। त
थाविधं दृष्ट्वोवाच॥ सखे किमेतत्। मृगोऽवदत्। अवधारितसुहृद्वाक्यस्य फलं। तथा चोक्तं।
सुहृदां हितकामानां यः शृणोति न भाषितं विपत्संनिहिता तस्य स नरः शत्रुनंदनः॥ काको
ब्रूते स शृगालः क्वास्ति। मृगेणोक्तं। मन्मांसार्थी तिष्ठत्यत्रैव। काको वदत्। मित्र उक्तमेव
मया। अप्यायं जंबुकोऽब्रवीत्। को मम अपराधः। काको ब्रूते॥ अपराधो न मेस्तीति नैतद्विश्वा राम
सकारणं। विद्यते हि नृशंसेभ्यो भयं गुणवतामपि॥ निःस्वस्य अरे जंबूक किं त्वया पापक ८
र्मणाकृतं। यतः॥ संलापितानां मधुरैर्वचोभिर्मिथ्योपचारैश्च वशीकृतानां। आशावतां श्रद्द

धतां च लोके। किमर्थिनां वंचयितव्यमस्ति॥१॥ अन्यच्च। उपकारिणि विश्रब्धे शुद्धमतौ यः
समाचरति पापं तं जनमसत्यसंधं भगवति वसुधे कथं वहसि पापे॥२॥ अथवा स्थितिरियं
दुर्जनानां॥ प्राक्पादयोः पतति खादति पृष्ठिमांसं। कर्णे कलं नन्नु विरौति शनैर्विचित्रं। छिद्रं
निरूप्य सहसा प्रविशत्यशंकः। सर्वं खलस्य चरितं मशकः करोति॥३॥ अथ प्रभातकाले क्षे
त्रपतिं लकुटहस्तं तं प्रदेशमागच्छंतमवलोक्य काकेनोक्तं। मित्र त्वमात्मानं मृतवत्संद
र्शयन्तिष्ठ। यदाहं शब्दं करोमि। तदा त्वमुत्थाय सत्वरमुपसरिष्यसीति। ततः क्षेत्रपतिना हर्षो
त्फुल्ललोचनेनावलोकितः। तथाविधो मृतः। आलोक्य चासौ आः स्वयं मृतोयमित्युक्त्वा मृग राम
स्य बंधनान्मोचयित्वा पाशान्संवरीतुं सयत्नो बभूव। ततः काकशब्दं श्रुत्वा मृगः पलायितः।
तमुद्दिश्य तेन व्याधेनोत्क्षिप्तेन लगुडेन शृगालो हतः। तथा चोक्तं। त्रिभिर्वर्षैस्त्रिभिर्मा ९
सैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः। अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते॥१॥ अतोऽहं ब्रवीमि भ
क्ष्यभक्षकयोः प्रीतिरित्यादि। काकः पुनराह। भक्षितेनापि भवता नाहारो मम पुष्कलः। त्वयि जीव
ति जीवामि चित्रग्रीव इवानघ॥ अन्यच्च॥ तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणां। शतां हि

हि॰उ॰ साधुशीलत्वा त्वच्चित्रग्रीवयोरिव॥३॥ स्वभावो न निवर्त्तते। किंच॥ साधोः प्रकुपितस्यापि म
१० नो नायाति विक्रियां॥ न॥ न हि तापयितुं शक्यं सागरांभस्तृणोल्कया॥३॥ हिरण्यको ब्रूते। चप
लस्त्वं चपलेन सह स्नेहः सर्वथा न कर्त्तव्यः॥ तथा चोक्तं॥ मार्जारो महिषो मेषः काकः कापु
भ रुषस्तथा। विश्वासात्प्रभवंत्येते विश्वासस्तत्र नोचितः॥ किंच॥ शत्रुपक्षे भवान् अस्माकं। उ
क्तं चैतत्। शत्रुणा न हि संदध्यात्सुश्लिष्टेनापि संधिना। सुतप्तमपि पानीयं शमयत्येव पावकं।
अन्यच्च॥ यदशक्यं न तच्छक्यं शक्यं चेच्छक्यमेव च। नोदके शकटं याति। न नौर्गच्छति स्थले॥१॥
अपरं च॥ महतामप्यर्थसारेणायो विश्वसिति शत्रुषु। विरक्तासु च भार्यासु तदंतं तस्य जीवितं॥ ल
घुपतनको वदत्। श्रुतं मया सर्वं किंतु ममैतावानेव संकल्पः॥ त्वया सह सौहृदं कर्त्तव्यं। मया
नोचानाहारेणात्मानं मत्वद्वारि व्यापादयिष्यामि तथा हि॥ मृद्घटवत्सुखभेद्यो दुःसंधानश्च राम
दुर्जनो भवति। सुजनस्तु कनकघटवत्। दुर्भेद्यश्चाशु संधेयः॥ किंच॥ द्रवत्वात्सर्वलोहानां नि १०
मित्तान्मृगपक्षिणां॥ भयाल्लोभाच्च मूर्खाणां संगतं दर्शनात्सतां॥१॥ अपरं चैतत् ज्ञातं। सतां संग
तमिष्यते॥ यतः॥ स्नेहच्छेदेपि साधूनां गुणा नायांति विक्रियां। भंगमपि हि मृणालानामनुब

ध्नंति तंतवः॥ अन्यच्च॥ श्रृणु। शुचित्वं त्यागिता शौर्यं समानं सुखदुःखयोः। दाक्षिण्यं चानुरक्ति
श्च सत्यता च सुहृद्गुणाः॥ एतैर्गुणैरुपेतः। पुनरन्यः को मया प्राप्तव्यः॥ हिरण्यको बहिर्नि
ष्क्रम्याह॥ आप्यायितोहं भवतानेन वचनामृतेन॥ तथा चोक्तं॥ घर्मार्त्तं न तथा सुशीतलजं
लैः स्नानं न मुक्तावली। न श्रीखंडविलेपनं सुखयति प्रत्यंगमप्यर्पितं। प्रीत्यै सज्जनभाषितं प्र
भवति प्रायो यथा चेतसः सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टिमंत्रोपमं। रहस्यभेदो याञ्चा
च नैष्ठुर्यं चलचित्तता। क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणं॥१॥ अनेन वचनाक्रमेण
नैक नैदेकमपि दूषणं त्वयि लक्ष्यते। यतः पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते। तेस्तब्धत्वमचा
पल्यं प्रत्यक्षेणावगम्यते॥ अपरश्च। अन्यथैव हि सौहार्दं भवेत्स्वच्छांतरात्मनः। प्रवर्त्ततेन्य
था वाणी मायोपहतचेतसः। तद्भवतु। भवतोभिमतं॥ ततः प्रभृति तयोः परस्परं सख्यमभवत्।
ततो हिरण्यको भोजनविशेषैर्वायसं संतोष्य स्वविवरं प्रविष्टः। वायसोपि स्वस्थानं गतः। ततस्त
योः प्रत्यहमन्योन्याहारादिदानेन कुशलप्रश्नैः विश्रंभालापैश्च कालो निवर्त्तते॥ एक

हि॰उ॰ ततो वायसो हिरण्यकमाह॥ वयस्य कष्टलभ्याहारं। स्थानमिदं। तदेतत्परित्यज्य स्थानांतरं गं
११ तुमिच्छामि। हिरण्यको ब्रूते॥ मित्र क्व गंतव्यं। हिरण्यको ऽवदत्। किं तत्स्थानं। वायसो ऽवदत्।
अस्ति दंडकारण्ये कर्पूरगौराख्यं सरः। तत्र चिरकालोपार्जितः प्रियसुहृन्मे मंथराभि
धानः कूर्मः सहजधार्मिकः प्रतिवसति॥ यतः परोपदेशे पांडित्यं सर्वेषां सुकरं नृणां। धर्मे
स्वयमनुष्ठानं कस्यचित्तु महात्मनः॥ स च मत्स्याहारविशेषैर्मां संवर्द्धयिष्यति। हिरण्य
को ब्रवीत्। तत्किमत्रावस्थाय मयापि कर्तव्यं। यतः॥ यस्मिन्देशे न संमानं न मित्राणि न
बांधवाः। न च विद्यागमः कश्चित्तं देशं परिवर्जयेत्॥ अपरंच॥ पंच यत्र न विद्यंते। न कुर्यात्त
त्र संस्थितिं। धनिनः श्रोत्रियो राजा। नदी वैद्यस्तु पंचमः॥ अतो मामपि तत्र नय। अथवा
यसस्तेन मित्रेण सह विचित्रकथालापैः सुखेन तस्य सरसः समीपं जगाम। ततो राम
मंथरो दूरादवलोक्य लघुपतनकमुच्छायातिथ्यं विधाय मूषकस्यापि आतिथ्यं सगौरवं च ११
कार। यतः॥ बालो वा यदि वा वृद्धो युवा वा गृहमागतः। तस्य पूजा विधातव्या सर्वस्या

भ्यागतो गुरुः॥ वायसोऽब्रवीत्॥ मित्र सविशेषमस्मै पूजां विधेहि। यतोऽयं पुण्यकर्मणां धु
रीणः। कारुण्यरत्नाकरो हिरण्यकनामा मूषकराजः। एतस्य गुणस्तुतिं जिह्वासहस्रद्वयेन
सर्पेश्वरः कर्तुं यदि समर्थः स्यादित्युक्त्वा चित्रग्रीवोपाख्यानं चोपवर्णितवान्। मंथरः सादरं
हिरण्यकं संपूज्याह॥ भद्र त्वमात्मनो निर्जनवनागमनकारणमाख्यातुमर्हसि। हिरण्यको
ऽवदत्। कथयामि श्रूयतां। अस्ति चंपाभिधानायां पुरि परिव्राजकानामावसथः। तत्र चूडाक
र्णो नाम परिव्राजकः प्रतिवसति। स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदंत
के। अवस्थाप्य स्वपिति। अहं च तदन्नमुत्प्लुत्य भक्षयामि। प्रत्यहमनंतरं। तस्य प्रियसुहृद्वीणा
कर्णो नाम परिव्राजकः समायातः। तेन सह नानादिग्देशकथाप्रसंगावस्थितो मम त्रासार्थं
जर्जरं वंशदंडेन ताडयत्॥ वीणाकर्ण उवाच॥ किमिति भवान्मम कथाविरक्तो ऽन्यासक्तः चू
डाकर्णो ब्रवीत्। भद्र नाहं विरक्तः। किंतु तावत्पश्यायं मूषको ममान्नापहारी सदा पात्रस्थं
भिक्षान्नं भक्षयति। वीणाकर्णो नागदंतकमवलोक्याह॥ कथं मूषको ऽल्पबलो ऽयमेतां

हि॰ ३ वत्र दूरं यावद्गच्छति। ततः कारणेनात्र भवितव्यं। तथा चोक्तं॥ नाकस्माद्युवती वृद्धं केशेष्वाकृ
१२ ष्य चुंबति। पतिं निर्दयमालिंग्य हेतुरत्र भविष्यति॥ चूडाकर्णः पृच्छति। कथमेतत्। वीणाकर्ण
ः कथयति। अस्ति गौडविषये कौशांबी नाम नगरी। तस्यां चंदनदासनामा वणिक्। महाधन
नो निवसति। तेन पश्चिमे वयसि वर्त्तमानेन कामाधिष्ठि[illegible]चेतसा धनदर्पात् लीलावती नाम्नी
वणिक्पुत्री परिणीता। सा च मकरकेतोर्विजयवैजयंतीव यौवनवती बभूव। स च वृद्धपति
स्तस्याः संतोषाय नाभवत्। यतः शशिनीव हिमार्त्तानां घर्मार्त्तानां रवाविव। मनो न रमते स्त्रीणां राम
जराजीर्णेंद्रिये पतौ॥ अपरं च। पलितेष्वपि दृष्टेषु पुंसः का नाम कामिता। भैषज्यमिव मन्यं १२
ते यदन्यमनसः स्त्रियः॥ स च वृद्धपतिस्तस्यामतीवानुरागवान्। यतः॥ धनाशा जीविताशा
च गुर्वी प्राणभृतां सदा। वृद्धस्य तरुणी भार्या प्राणेभ्योऽपि गरीयसी॥ ३॥ अन्यच्च। नोपभुक्तं
न च त्यक्तुं शक्नोति विषयान् जरी। अस्थि निर्दशनः श्वेव जिह्वया लेढि केवलं॥ ४॥ अथ
सा लीलावती यौवनदर्पादतिक्रांतकुलशीलमर्यादा केनापि वणिक्पुत्रेण सहानुराग

वती बभूव। यतः। स्वातंत्र्यं पितृमंदिरे च वसतिर्यात्रोत्सवे संगतिः गोष्ठी पूरुषसंनिधाननिय
यमो वासो विदेशे तथा। संसर्गः सह पुंश्चलीभिरसकृत् वृत्तेर्निजायाः क्षतिः पत्युर्वार्द्धक
मीर्षितं प्रवसनं नाशस्य हेतुः स्त्रियः॥ अपरं च॥ पाषंडजनसंसर्गः पत्या च विरहोऽटनं स्वप्नम
न्यगृहे वासः स्त्रीणां वै दूषणानि षट्॥ किंच॥ स्थानं नास्ति क्षणो नास्ति। नास्ति प्रार्थयिता नरः। यि ४
तेन नारद नारीणां सतीत्वमुपजायते॥ अन्यच्च॥ घृतकुंभसमा नारी तप्तांगारसमः पुमान्।
तस्मात् घृतं च वह्निं च एकस्थाने न धारयेत्॥ अपि च॥ पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
पुत्रस्तु स्थविरे भावे न स्त्री स्वातंत्र्यमर्हति॥ एकदा सो लीलावती रत्नाव[illegible]लीकिरणकुर्वरे प
र्यंके न वणिक्पुत्रेण सह विश्रंभालापैः सुखासीना तमवलक्षितोपस्थितं पतिमवलोक्य स
हसोत्थाय केशेषु गृहीत्वा निर्भरमालिंग्य चुंबितवती। अनंतरं जारः पलायितः। तदालिंगनमा
लोक्य समीपवर्त्तिना कुट्टिन्या चिंतयत्। नाकस्मादित्यादि। ततस्तया कुट्टिन्या तत्कारणं परिज्ञा
य सा लीलावती दंडिता। अतोऽहं ब्रवीमि नाकस्मादित्यादि। मूषकबलोपष्टंभकेनाप्यत्र भवि

हि॰उ त्व्यं।इगांविचिंत्यकारणंचात्रवाऽल्पधनमेवसंभवति।यतः॥धनवान्बलवाँल्लोकेसर्वःसर्वत्र
१२ सर्वदा।प्रभुत्वंधनमूलंहिराज्ञामप्युपजायते॥१॥ततःखनित्रमादायतेनपरिव्राजकेनविवरंख
नित्वाममचिरंतनिधानंगृहीतं॥ततःप्रभृत्यहंनिजशक्तिहीनःसत्वोत्साहरहितः।आहार
मप्युत्पादयितुमशक्तःसत्रासंमंदंसर्पंश्चूडाकर्णेनावलोकितः।ततस्तेनोक्तं॥अर्थवान्बलवा
न्लोकेअर्थाद्भवतिपंडितः।पश्यैनंमूषकंपापंस्वजातिसमतांगतिं॥किंच॥अर्थेनहिविही
नस्यपुरुषस्याल्पमेधसः।क्रियासर्वाविनिश्यंतिग्रीष्मेकुसरितोयथा॥यस्यार्थास्तस्यमित्रा
णियस्यार्थास्तस्यबांधवाः।यस्यार्थाःसपुमान्लोके।यस्यार्थाःसचपंडितः॥अन्यच्च॥अ
पुत्रस्यगृहंशून्यंसंमित्ररहितस्यच।मूर्खस्यहृदयंशून्यंसर्वशून्यंदरिद्रता॥अपिच॥ता
नींद्रियाण्यविकलानितवपुस्तदेवसाबुद्धिरप्रतिहतावचनंतदेव॥अर्थोष्मणाविरहितःपुरुषः राम
सएवतान्यक्षणेनभवतीतिविचित्रमेतत्॥एतत्सर्वमाकर्ण्यालोचितंममात्रावस्थानंनयुक्तं।स्वा १३
नीयञ्चान्यस्मैतद्वृत्तांतकथनंतदप्यनुचितंयतः॥अर्थनाशंमनस्तापंगृहेदुश्चरितानिच।वंच

नंचापमानंचमतिमान्नप्रकाशयेत्॥तथाह्युक्तं॥अत्यंतविमुखेदैवेव्यर्थेयत्नेचपौरुषेमनस्वि
नोदरिद्रस्यवनादन्यःकुतःसुखं॥अन्यच्च॥मनस्वीम्रियतेकामंकार्पण्यंनतुगच्छति।अपि
निर्वाणमायाति।पावकोनचशीततां॥किंच॥कुसुमस्तवकस्येवद्विगतीतुमनस्विनः।सर्वलो
कस्यवामूर्ध्निविशीर्यतवनेपिवा॥यदत्रैवप्रार्थनयाजीवनंतदतीवगर्हितं॥वरंविभवहीनेन
प्राणैःसंतर्पितोनलः।नोपचारपरिभ्रष्टःकृपणःप्रार्थितोनरः॥२॥अपरंच॥दारिद्र्याद्ध्रिय
मेतिह्रीपरिगतःप्रभ्रश्यतेतेजसोनिस्तेजाःपरिभूयतेपरिभवान्निर्वेदमागच्छतिनिर्विण्णः
शुचमेतिशोकविहतोबुद्ध्यापरित्यज्यतेनिर्बुद्धिःक्षयमेत्यहोनिधनतासर्वापदामास्पदं॥१॥
किंच॥वरंकार्यंमौनंनचवचनमुक्तंयदनृतं।वरंक्लैब्यंपुंसांनचपरकलत्राभिगमनंवरंप्राण
त्यागोनचपिशुनवाक्येष्वभिरतिर्वरंभिक्षाशित्वंनचपरधनास्वादनसुखं॥१॥अपिच॥
सेवेवमानमखिलंज्योत्स्नेवतमोजरेवलावण्यं।हरिहरकथेवदुरितंगुणशतमप्यर्थिता
हरति।विमृश्यतत्किंमहंपरपिंडेनात्मानंसंयोजयामि॥कष्टंभोस्तदपिद्वितीयंमृत्युद्वारं॥

यतः पल्लवग्राहि पांडित्यं क्रयः क्रीतं च मैथुनं। भोजनं च पराधीनं त्रयः पुंसां विडंबना॥ अन्यच्च॥
रोगी चिरप्रवासी परान्नभोजी परावसथशायी। यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः॥
इत्यालोच्यमोऽहं पुनरपि कतिपय दिनानि गमयित्वा तदन्नं ग्रहीतुं ग्रहमकरवं। तथा चोक्तं॥
लोभेन बुद्धिश्चलति लोभो जनयते तृषां। तृषार्तो दुःखमाप्नोति परत्रेह च मानवः॥ अतोऽहं वीणा
कर्णेन तेन जर्जर वंशखंडेन ताडितः स चाहमचिंतयं॥ लुब्धो ह्यसंतुष्टो नियतमापदां हि।
तथा च सर्वाः संपत्तयस्तस्य संतुष्टं यस्य मानसं। उपानद्गूढपादस्य ननु चर्मावृतेव भूः॥ अ
न्यच्च॥ संतोषामृततृप्तानां यत्सुखं शांतचेतसां। कुतस्तद्धनलुब्धानामितश्चेतश्च धावतां॥
किंच॥ असेवितेश्वरद्वारमदृष्टविरहव्यथं। अनुक्तक्लीववचनं धन्यं कस्यापि जीवितं॥ यतः राम
न योजनशतं दूरं वाह्यमानस्य तृष्णया। संतुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः॥ ततः सर्व १४
थाऽवस्थोचितः कार्यपरिच्छेदः श्रेयान्। उक्तं च। को धर्मो भूतदया किं सौख्यमरोगिता। जग
ति यन्तोः कः स्नेहः सद्भावः किं पांडित्यं परिच्छेदः॥ तथा हि॥ त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं

त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ अपरंच॥ पानीयं वा निराहारं स्वाद्वन्नं वा
भयोत्तरं। विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः॥ इत्यालोच्याहं निर्जनं वनमागतः। ततोऽस्मत्पु
ण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्यानुगृहीतः। अधुना च॥ पुण्यपरंपरया भवदाश्रयो
मया स्वर्ग एवायं प्राप्तः॥ यतः संसारविषवृक्षस्य द्वे फले अमृतोपमे। काव्यामृतरसास्वा
दः संगमः सज्जनैः सह। मंथर उवाच॥ युष्माभिरतिसंचयः कृतस्तस्यायं दोषः। यतः॥
उपार्जितानामर्थानां त्याग एव हि रक्षणं। तडागोदरसंस्थानां परीवाह इवांभसां॥ अन्यच्च॥ नि
जसौख्यं परित्यज्य यो धनार्जनमिच्छति। परार्थभारवाहीव क्लेशस्यैव हि भाजनं॥ अपरंच॥
दानोपभोगरहितधनेन यदि धनिनो भवामः। किं न तेनैव धनेन धनिनो वयं॥ अन्यच्च॥ असं
भोग्येन सामान्यं कृपणस्य धनं परैः। अस्येदमिति संबंधो हानौ दुःखेन गम्यते। तथा चोक्तं॥ दा
नं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यं त्यागसहितं च वित्तं। दुर्लभमेतच्चतुष्टयं न
रां। उक्तं परस्त्रि। कर्तव्यः संचयो नित्यं कर्तव्यो नातिसंचयः। पश्य संचयशीलेन धनुषा

हि. उ. तानिपातितः।६॥ सोऽब्रवीत्॥ कथमेतत् मंथरः कथयति। अस्ति कल्याणकटकवास्तव्यो भैरवो
नाम व्याधः सचैकदा पापर्द्धिलुब्धः सन् विंध्याटवीमध्यं गतः। तत्र तेन व्यापादितं मृगमादाय
१४ गच्छता घोराकृतिः शूकरो दृष्टः। ततस्तेन मृगं भूमौ निधाय शूकरः शरेणाहतः। शूकरेणाग
त्य घननिर्घोरगर्जितं कुर्वाणेन स व्याधो मुष्कदेशे हतः। छिन्नद्रुम इव पपात। यतः। जलमग्नि
विषं शस्त्रं। क्षुद्व्याधिः पतनं गिरेः। निमित्तं किंचिदासाद्य। देही प्राणैर्विमुच्यते। अत्रांतरे दी
र्घरावो नाम जंबुकः परिभ्रमन्नाहारार्थी तान् मृगव्याधशूकरानवलोकयामास। आलोक्या
चिंतयत्। सहद्भाज्यं मे समुपस्थितं। अथवा॥ अचिंतितानि दुःखानि यथैवायांति देहिनां। सुखा
न्यपि तथा मन्ये दैवमत्रातिरिच्यते॥१॥ भवतु एभिर्मांसैर्मासमेकं समधिकं यावत् जीवनं मे भवि राम
ष्यति। ततः प्रथमबुभुक्षायां तावदिमं निस्वादं कोदंड [illegible] नील [illegible] स्नायुबंधं खादयामीत्युक्त्वा १५
तथाकरोत्। ततः छिन्ने स्नायुबंधे द्रुतमुत्पतितेन धनुषा हृदि भिन्नः स दीर्घरावः पंचत्वं गतः। अतो
ऽहं ब्रवीमि कर्त्तव्यः संचयो नित्यमित्यादि। किंच। यद्ददाति यदश्नाति तदेव धनिनो धनं। अन्ये

मृतस्य क्रीडंति दारैरपि॥ इदानीं यातु किमिति क्रांतोपवर्णनेन। यतः। नाप्राप्यमभिवांछं
ति नष्टं नेच्छंति शोचितुं। आपत्स्वपि न मुह्यंति नराः पंडितबुद्धयः॥ तद्वयस्य सर्वथा सोत्साहेन
त्वया भवितव्यं। शास्त्राण्यधीत्यापि भवंति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान्। सुचिंतितमप्यौ
षधमातुराणां न नाममात्रेण करोत्यरोग्यं। अन्यच्च॥ न स्वल्पमप्यध्यवसायभीरोः करोति वि
ज्ञानविधिर्गुणं हि। अंधस्य किं हस्ततलस्थितोपि प्रकाशयत्यर्थमिह प्रदीपः॥१॥ तदत्र सविशे
षेण प्रीतिः करणीया। एतदपि न मंतव्यं। स्थानभ्रष्टा न शोभंते केशा दंता नखा नराः॥ इति विज्ञाय
मतिमान्। स्वस्थानं न परित्यजेत्॥१॥ एतदपि कापुरुषस्य वचनं॥ देशांतरं त्यजमिच्छंति सिंहाः
सत्पुरुषा गजाः। तत्रैव निधनं यांति काकाः कापुरुषा मृगाः॥१॥ तथा चोक्तं। को वीरस्य मनस्विनः
स्वविषयः को वा विदेशः स्मृतो। यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितं। यद्दंष्ट्रानखलांगूल
प्रहरणः सिंहो वनं गाहते। तस्मिन्नेव हतद्विपेंद्ररुधिरैस्तृष्णां छिनत्यात्मनः॥१॥ अपरं च॥ नि
पानमिव मंडूकाः सरः पूर्णमिवांडजा। सोद्योगं नरमायांति विवशाः सर्वसंपदः॥ किंच॥ उ

हि॰ ३॰ खमापतितंसेवेत्सुखमापतितंतथा॥ चक्रवत्परिवर्त्तंतेदुःखानिचसुखानिच॥ अन्यच्च॥ उत्साह
संपन्नमदीर्घसूत्रं। क्रियाविधिज्ञंव्यसनेष्वसक्तं। शूरंकृतज्ञंदृढसौहृदंच। लक्ष्मीस्वयंयातिनि
१६ वासहेतोः॥१॥ विशेषतश्च। विनाप्यर्थैर्धीरः स्पृशति बहुमानोन्नतिपदं। परित्यक्तोप्यर्थैःपरिभ
वपदंयातिकृपणः। स्वभावादुद्भूतांगुणसमुदयावाप्तिविषयां। द्युतिंसैंहींकिंश्वाधृतकनकमालो
पिलभते॥ किंच। धनवानितिहिमदस्ते किंगतविभवोविखादमुपयासि। करनिहतकंदुकसमाःपा
तोत्पातामनुष्याणां। पश्य। अभ्रछायाखलप्रीतिर्नवसस्यानियोषितः। किंचित्कालोपभोग्यानि
यौवनानिधनानिच। अन्यच्च॥ वृत्यर्थंनातिचेष्टेतसाहिधात्रैवनिर्मिता। गर्भाधिपतितेजंतौ
मातुःप्रस्रवतेस्तनः। सखे। येनशुक्लीकृताहंसाःशुकाश्चहरितीकृताः। मयूराश्चित्रिताये
नसतेवृत्तिंविधास्यति। अपरंच॥ जनयंत्यर्जनेदुःखंतापयंतिविपत्तिषु। मोहयंतिचसंप राम
त्तौकथामर्थाःसुखावहाः॥ धर्मार्थंयस्यवित्तेहावरंतस्यनिरीहता। प्रक्षालनाद्धिपंकस्यदूरा १६
दस्पर्शनंवरं। यथाह्यामिषमाकाशेपक्षिभिःश्वापदैर्भुवि। भुंजतेसलिलेमत्स्यैस्तथास

र्वत्रवित्तवान्॥ राजतःसलिलादग्नेश्चौरतःस्वजनादपि। भयमर्थवतांनित्यंमृत्योःप्राणभृता
मिव॥ जन्मनिक्लेशबहुलेकिंतुदुःखमतःपरं। इच्छासंपद्यतोनास्तियच्चेच्छानानिवर्त्तते॥ ध
धनंतावदसुलभंलब्धंकृच्छ्रेणपाल्यते। लब्धनाशोयथामृत्युस्तस्मादेतन्नचिंतयेत्। तृष्णा
यांचेत्परित्यक्ताःकोदरिद्रःकईश्वरः। तस्याश्चेत्प्रसरोदत्तोदास्यंचशिरसिस्थितं॥ यद्यदेवहि
वांछेततततोवांछानिवर्त्तते। म॥ प्राप्तएवार्थतःसोऽर्थोयतोवांछानिवर्त्तते॥ किंबहुनामम
पक्षपातान्मयैवसहात्रकालोनीयतां। यतः। आमरणांताःप्रणयाःकोपास्तत्क्षणभंगुराः।
परित्यागाश्चनिःसंगानभवंतिमहात्मनां॥ लघुपतनकोब्रूते। धन्योसिमंथरसर्वथाश्लाघ
णीयगुणोसि। यतःसंतएवसतांनित्यमापदुद्धरणाक्षमाः। गजानांपंकमग्नानांगजाएव
धुरंधराः॥ श्लाघ्यःसएवोभुविमानवकानांसउत्तमःसत्पुरुषःसएव। यस्यार्थिनोवाशरणा
गतावानाशाविभंगाद्विमुखाःप्रयांति। ततस्तेनतत्रस्वेच्छाहारविहारंकुर्वाणाःसंतुष्टाःसु
खंवसंति। अथचित्रांगनामामृगःकेनापित्रासितःतत्रागत्यमिलितःततस्तत्पश्चा

हि॰उ॰ दायांतं भयहेतुकमाकलय्य मंथरो जलं प्रविष्टः। मूखको विवरं च। काकश्चोड्डीय वृक्षाग्रे गतः। त
तो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न कोऽप्यालोकितः। पश्चात्तद्वचनादागत्य पुनः स
७८ र्वे मिलित्वा प्रविष्टाः। मंथरेणोक्तं। मृग स्वागतं ते। स्वेच्छयाहारमनुभूयतां। अत्रावस्थानेन
स्थानमिदं सनाथी क्रियतां। चित्रांगो ब्रूते॥ लुब्धकेन त्रासितोऽहं भवतां शरणमापन्नो भव
द्भिः सह मित्रत्वमिच्छामि। हिरण्यकोऽवदत्। मित्रत्वं तावदस्माभिः सहायत्नानिष्पन्न
मेव भवतः। यतः। औरसं कृतसंबंधं तथा वंशक्रमागतं। रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतु
र्विधं॥ तदत्र स्वगृहनिर्विशेषेण स्थीयतामिति। तच्छ्रुत्वा मृगः सानंदः कृतस्वेच्छाहारः पा
नीयं पीत्वा जलासन्नतरुच्छायायामुपविष्टः॥ अथ मंथरो ब्रूते सखे मृग केन त्वं त्रासितो
ऽसि। अस्मिन्निर्जने वने कदाचिद्व्याधाः संचरंति। मृगेणोक्तं। अस्ति कलिंगविषये रुक्मा राम
गदो नाम नरपतिः। दिग्विजयक्रमेणागत्य चंद्रभागानदीतीरे समावासितो वर्तते। प्रात ७८
श्च तेनागत्य कर्पूरसरस्तीरे भवितव्यमिति। व्याधानां मुखात्किंवदंती श्रूयते। तत्रापि प्रा

तरेवावस्थानं भयहेतुरेवेत्यालोच्य यथाकार्यमारभ्यतां। कूर्मः सभयमाह। जलाशयांतरं
तावदहं गच्छामि। काकमृगावप्युक्तवंतौ। एवमस्तु। ततो हिरण्यको विमृश्याब्रवीत्। जला
शयांतरे प्राप्ते मंथरस्यास्ति कुशलं। स्थले गच्छतः कुविधाः। यतः। अंभांसि जलजंतूनां दुर्गं दु
र्गनिवासिनां स्वभूमिः श्वापदादीनां राज्ञां मौलं बलं बलं॥ सखे लघुपतनक अनेनोपदेशेन
स्वयं विया यथा वध्वाः पीडितं स्तनकुड्मलं। वणिक्पुत्रो भवद्दुःखी तथैव भविष्यसि। ते ऊचुः
कथमेतत्। हिरण्यकः कथयति। अस्ति कन्यकुब्जदेशे राजा वीरसेनो नाम। तेन सुवीरपु
र नाम्नि महानगरे तुंगबलो नाम राजपुत्रो भोगपतिः कृतः। स महाधनस्तरुणस्तत्र नगा
रं भ्राम्यन्नतिप्रौढयौवनां लावण्यवतीं वणिक्पुत्रवधूमालोकयामास॥ ततः स्वगृहं गत्वा
स्मराकुलितमिति। तस्याः कृते दूतीं प्रहितवान्। सापि लावण्यवती दृशांदत्तस्वलोक
नेन स्मरशरप्रहारजर्जरितहृदया तदेकचित्ता भवत्। तथा ह्युक्तं॥ स्त्रीणाम प्रियः कश्चिन्न
प्रियो वापि न विद्यते। गावस्तृणमिवारण्ये प्राप्नुवंति नवं नवं॥ अथ दूतीवचनं श्रुत्वा लावण्य
वत्युवाच। अहं पतिव्रता॥ ततः सा भार्याया गृहे दूती। सा भार्यायाश्च पुत्रिणी। सा भार्यायाः प

तिप्राणा। साभार्यायापतिव्रता॥ अन्यच्च॥ नसाभार्येतिमंतव्यायस्यां भर्त्तानतुष्यति। अग्निसाक्षि
कमर्यादो भर्त्ताहिशरणंस्त्रियः॥ ३॥ ततोयद्यद्राविशतिमे प्राणेश्वरस्तत्परमहं विचारितं करोमि।
इत्युक्तं। सत्यमेतत्। तावराजपुत्रउवाचसत्यमेतत्। एतत्सर्वंश्रुत्वागत्वाचद्रुतमातुगवलस्यनिवे
दितं। गुंगवलोब्रवीत्। स्वामिनानीयस्तमर्पयितव्येति। कथमेतत्सका। कुहन्याह॥ उपायः
क्रियतां। तथाचोक्तं॥ उपायेनहियच्छक्यं नतच्छक्यं पराक्रमैः॥ शृगालेनहतोहस्ती गच्छतापंक
वर्त्मना॥ राजपुत्रोब्रूते॥ कथमेतत्। सकथयति। अस्तिब्रह्मारण्येकर्पूरतिलकोनामहस्तीत
माल्लोक्यसर्वेशृगालाश्चिंतयंति। यद्ययंकेनाप्युपायेनम्रियते। तदास्माकमेतद्देहेनमासचतु
ष्टयंस्वेच्छाभोजनंभविष्यति। ततएकेनवृद्धशृगालेनप्रतिज्ञातं। मयाबुद्धिप्रभावादेतन्मरणं
साधयितव्यं। अनंतरंच। सशृगालः कर्पूरतिलकस्यसकाशंगत्वासाष्टांगपातंप्रणम्योवाच॥ राम
देवदृष्टिप्रसादंकुरु। हस्तीब्रूते। कस्त्वंकुतःसमायातः। सोब्रवीत्। जंबूकोहंसर्वैर्वनवासि १८
भिःपशुभिःमिलित्वाप्रस्थापितोहं। उक्तंच। विनाराज्ञात्रवस्थातुंनयोग्यं। तत्रात्राटवीराज्ये
अभिषेक्तुंभवान्सर्वस्वामिगुणोपेतोनिरूपितः। यतः। कुलाभिजाताचारैर्यःसचशुद्धःप्रतापवा

धार्मिकोनीतिकुशलः सस्वामीयुज्यतेभुवि॥ १॥ अपरंचपश्य॥ राजानंप्रथमंविंदेत्। ततोभार्यां
ततोधनं। राजन्यसतिलोकेस्मिन्। कुतोभार्याकुतोधनं॥ २॥ अन्यच्च॥ पर्जन्यइवभूतानामाधार
पृथिवीपतिः। विकलेपिहिपर्जन्ये। जीव्यतेनतुभूपतौ॥ ३॥ नियतविषयवर्तीप्रायशोदंडयोगा
ज्जगतिपरवशेस्मिन्दुर्लभःसाधुवृत्तः। कृशमपिविकलंवाव्याधितंवाधमंवा। पतिमिवकुल
नारीदंडभीत्याभ्युपैति। यथालग्नवेलानचलतितथासत्वरमागम्यतामित्युक्त्वाउत्थायच
लितः। ततोसौराज्यलोभाकृष्टःकर्पूरतिलकः शृगालवर्त्मनाधावन्महापंकेनिमग्नः। हस्तिनो
क्तं। सखेशृगालकिमधुनाविधेयं। पंकेनिपातितोहं। शृगालेनविहस्योक्तं। देवमम
च पुच्छेकरावलंबनंकृत्वाउत्तिष्ठ। यस्यमद्वचसित्वयाविश्वासःकृतः। तथाचोक्तं। यंतइवसतां
नित्यमापदुद्धरणहेतवः। गजानांपंकमग्नानांगजाएवधुरंधराः। यदिसत्संगरतोभवि
ष्यसि॥ अथसज्जनगोष्ठीषुपतिष्यसि॥ २॥ अतोहंब्रवीमि। उपायेनहियच्छक्यमित्यादि। यथा
कुट्टन्युपदेशेनतंचारुदत्तनामानंवणिक्पुत्रंसराजपुत्रसेवकंचकार। ततोसौसर्वविश्वा

हि॰ उ॰ सकार्येषु नियुक्तः। एकदा तेन राजपुत्रेण स्नानानुलिप्तेन कनकरत्नालंकारधारिणोक्तं। मया मासमेकं
१९ यावद्गौरीव्रतं कर्तव्यं। तदद्यारभ्य दिनं प्रतिरात्रमेकमेकां कुलीनां युवतीमानीय समर्पय। सा मया
यथोचितं पूजयितव्येति। स चारुदत्तस्तथाविधां तरुणीमानीय समर्प्य पश्चात्प्रच्छन्नरूपः किमयं क
रोतीति निरूपयति। स च तुंगबलस्तां युवतीमस्पृष्ट्वैव वस्त्रालंकारैः संपूज्य रक्षकं दत्त्वा तत्क्षणात्प्रस्थापितवान्। अ
थ वणिजा तु तेन तद्दृष्ट्वोपजातविश्वासेन लोभाकृष्टचेतसा स्ववधूरानीय समर्पिता। स च राजपुत्र
स्तां हृदयप्रियां लावण्यवतीं परिज्ञाय योद्धाया निर्दयमालिंग्य निद्रामिलितलोचनः। पर्यंके
तया सह निधुवं दातदालोच्य वणिक्पुत्रश्चित्रलिखित इवेति। कर्तव्यतामूढः परं विषादमु १९
पागतः। तथा त्वयापि भवितव्यमिति। तद्धितवचनमवधार्य महता भयेन मुग्धेव समंथरस्तं राम
जलाशयमुत्सृज्य चलितः। तेपि हिरण्यकादयस्तमनुपसरंति स्म। ततः केनापि व्याधेन तं काननं १९
पर्यटता मंथरः प्राप्तः। प्राप्य च तं गृहीत्वा। उत्थाय धनुषि बद्ध्वा भ्रमणक्षुत्क्षामाकुलो गृहाभि
मुखं प्रयातः। अथ ते मृगवायसमूषकाः परं विषादं गताः संतस्तमनुजग्मुः। हिरण्यको विल